-पक्ष- (for -जल्प-). A_{0-2} $F_{1.4}$ I H संभाव्यमाना ($H_{1c.v.\,3c.v.}$ as in text); D F_2 J X $Y_{1.3-6.8}$ T $G_{2.3.5}$ M_3 आभाष्यमाणा (F_2 Y_3 T_2 °णो; J_3 °णैर्; T_3 °णं); $E_{3.4}$ F_3 $M_{1.2}$ संभाष्यमाणो ($E_{3.4}$ °नो); Y_2 आकीर्यमाणो; G_4 आक्रुश्यमाणा. F_2 J_1 जनो (for जनैर्). — [d]) $F_{2.5}$ Y_2 नो; Y_3 सं- (for न). F_2 क्रुद्धो; X_2 क्रुद्धः. D पथि चैव; M_4 पथिकैः सु-. C हृष्ट- (for तुष्ट-). A_3 गच्छंति ते; E_0 (m.v. as in text).$_5$ and E_c यास्यंति ते.

BIS. 2225 (889) Bhartr. lith. ed. I. **3.** 98, II. 54. Galan 91. Schiefner and Weber. p. 24. Subhāsh. 284; SM. 910; SSV. 892; SSD. **4.** f. 26a.

244 {Ś} Om. in B_2 (wrongly) C D $M_{4.5}$ Mysore 582 and Harilāl's lith. ed. Y_2 lost on missing fol. — [a]) A E_c I Y_3 गल्लभित्तीर्; F_3 गंडभित्तीन्. A $E_{1.4.5}$ X °शीत्कृतान्या° (A_3 °ना°); F_4t.v. सीत्कृतं ह्या°; Y_{1A} स्वीत्कृतान्या°; Y_3 संसीत्कृतान्या°. F_2 I_c X Y_7 [आ]ददाना. — [b]) A_3 $E_{0.5}$t वक्षस्यूत्-; B_1 G_3t वक्षस्तत्-; $E_{1.3.4}$ Y_7 वक्षस्युत्-; $F_{2.3}$ वक्षःसत्-; F_5 वक्षःस्था-. A_3 -कंचनेषु; B_1 -कुंकुमांक-; Y_3 -कंचुकीषु. G_4 स्तनपुट-. X -[उ]द्वंडम् (for -[उ]द्भेदम्). F_1 Y_3 आसादयंतः. — [c]) A_2 W_1 ऊरूणां; F_1 हस्ताना-; F_2 ऊरूनोत्-; F_4t.v. गात्राण्युत्-. G_1 -तटी-. A_2 I_t संश्रयंतो (A_2 °तं); A_3 श्रंसयंतं; **S** ($M_{4.5}$ om.) स्रंसयंतो (G_3t भ्रंश°; G_4 स्रंसयन्). $A_{2.3}$ शुकानि; B_1 अंशुकांति-; Y_{1AB} अंकुशानि. — [d]) G_4 वृत्तं (for व्यक्तं). F_5 W विटचरितकृतः; G_1 $M_{1.2}$ विदितरतिकृतः (G_1 °ताः). E_3t वांतवाताः; G_3 वंतिपातः.

BIS. 2302 (918) Bhartr. ed. Bohl. lith. ed. **III. 1. 49.** Haeb. 52. Śatakāv. 68; Śp. 3945; SRB. p. 348. 19; SBH. 1855; SKM. **64.** 9 (Baṅkalāvarta); Sabhyālaṅkaraṇa of Govindajit f. 27a; SLP. **5.** 37 (Bh.).

245 {V} Found only in **S**. — [a]) X G_4 श्रियं; Y_4 रसां; T_3 रमा (for रमां). W_2 $Y_{2.7}$ $T_{2.3}$ $G_{1.3}$ M_3 आस्थायिनीम्. Y_3 आश्रय. — [b]) $W_{1c.\,2c.\,3}$ G_1 -भ्रकुटी-; W_4 $Y_{3.7}$ $T_{2.3}$ -भृकुटी-. W -कुटीरविहर-; Y_7 -पटीरपणन-; G_2t -कुटीवितरण-; M_4 -कुटीविरहिण- (for -कुटीविहरण-). W_2t -रण्यांगनां. — [c]) Y_3 कंथां. W -कंचुकितः. X_2 Y_3 भुवन-. — [d]) Y_3 °वीथिषु (for °पङ्क्तिषु). X_2 वाणिपात्र-; Y_7 पाणिमात्र-. M_2 अवेक्षामहे.

BIS. 2304 (920) Bhartr. ed. Bohl. **3.** 66. Haeb. 64. lith. ed. **I. 53.** Galan 60. Śatakāv. 105; SSD. **4.** f. 31b.

छिन्नोऽपि रोहति तरुः क्षीणोऽप्युपचीयते पुनश् चन्द्रः।
इति विमृशन्तः सन्तः संतप्यन्ते न विधुरेषु ॥ २४६ ॥
जल्पन्ति सार्धमन्यने पश्यन्त्यन्यं सविभ्रमाः।
हृदये चिन्तयन्त्यन्यं प्रियः को नाम योषिताम्॥ २४७ ॥
जातः कूर्मः स एकः पृथुभुवनभरायार्पितं येन पृष्ठं
श्लाघ्यं जन्म ध्रुवस्य भ्रमति नियमितं यत्र तेजस्विचक्रम्।
संजातव्यर्थपक्षाः परहितकरणे नोपरिष्टान् न चाधो
ब्रह्माण्डोदुम्बरान्तर्मशकवदपरे जन्तवो जातनष्टाः ॥ २४८ ॥

---

246 { N } Om. in J3 X Y1.2.7.8 T3 G M Śṛṅgeri 309 Mysore 1642 and Jodhpur 1. —b) F2 अपचीयते. F5 चंद्रः; J शनैश्चंद्रः; W3.4 लोके (for पुनश् चन्द्रः). — c) C विमृषंतः. — d) B1 संतप्येरन्. C D Eo.1.3.5 I W1 ते विपदा (W1 °दि); E2 H विधुरेपि; F2 च विपदा; J1 सत्सु विदुरेषु; J2 विधुरेषु सत्सु; W2-4 विधुता लोके; Y8 विपदि लोकेषु; Y4.6 लोकेषु; Y5 विधिरेषः; T1.2 विश्लथेषु लोकेषु (for विधुरेषु).

BIS. 2314 (925) Bhartṛ. ed. Bohl. 2. 84. Haeb. 80. lith. ed. I and III. 86, II. 87. Galan 85. Saṁskṛtapāṭhopa. 62. cf. Galan varr. 60; SRB. p. 47. 93; SRK. p. 19. 80; SSD. 2. f. 99b.

247 { Ś } Om. in E NS 1 Adyar XXVIII-M-56. — a) X1 जल्पंती; X2 जल्पलंती; T2.3 ज्वलंति (for जल्पन्ति). Y3.7 सार्थम्. — b) W4 पश्यंसत्यं; Y1AB पश्यत्यन्यं; M4.5 विशंत्यन्यं. W2.4 सविभ्रमः; Y1 (pr. text) M3 सविभ्रमा; G4 ससंभ्रमाः. — c) B2 C H I o J F3-5 Y T G हृद्गतं (F4 °ता); M हृद्गतं. D F5 It X2 Y1-8 चिंतयत्यन्यं. — d) C प्रयः; J1 स्त्रियः. Y1 योषितः.

BIS. 2371 (951) Bhartṛ. ed. Bohl. 1. 81. Haeb 84. lith. ed. II. 61. Vṛddhacāṇ. 16. 2. Pañc. ed. Koseg. I. 151. ed. Orn. 111. ed. Bomb. 135. Vikramaca. 34. Subhāsh. 23; Śp. 1497; SRB. p. 348. 5 (Vyāsa); SBH. 2771 (Śrī Vyāsamuni); SRH. 54. 2 (Pratāparudrīya); SRK. p. 115. 13 (Sphuṭaśloka); SU. 404; SSD 4. f. 20a; SSV. 1401; SLP. 4. 101 (Bh.).

248 { V, N } Om. in A C E (Eo.2.5 extra) F5 W BORI 329 Punjab 2101 BU Jodhpur 1 NS1-3 Adyar XXII-B-10 and Mysore 1642. — a) E2 एषः; Y7 एवः (for एकः). F1 °भरोत्सर्पिनं; M1 °भरायार्पितो. I कष्टं; M1 पृष्ठः. — b) Y1A भवति (for भ्रमति). D Y1B G4 येन (for यत्र). — c) F4 संयाता; It उत्पन्न-; X संजाता (for संजात-). G1 M3 °करणं (for °करणे). Y3 नोपरिष्टादधो वा. Y1 °रिष्टात्; Y2 °रिष्ठान; M4.5 °दिष्टान (for °रिष्टान्). M4.5 पंथाः; M3 -याधो. — d) J1.3 Y8 G2t ब्रह्मांडोदुम्बरांतर् (Y8 °ते); X °डोदुबरांते. J1 इव ऽपरे (for -वदपरे). E2 Y1.3 प्राणिनो जातनष्टाः (E2 °निष्टाः); X प्राणिनः संचरंति.

BIS. 2377 (956) Bhartṛ. lith. ed. I. 3. 94, II. 98, III. 91. Schiefner and Weber p. 25; Śp. 4154 (Bh.); SRB. p. 98. 11; SBH. 1033; SSV. 554.

जीर्णा एव मनोरथाः स्वहृदये यातं च तद् यौवनं
हन्ताङ्गेषु गुणाश् च वन्ध्यफलतां याता गुणज्ञैर्विना ।
किं युक्तं सहसाभ्युपैति बलवान् कालः कृतान्तोऽक्षमी
आ ज्ञातं मदनान्तकाङ्घ्रियुगलं मुक्त्वास्ति नान्या गतिः ॥२४९॥

ज्ञानं सतां मानमदादिनाशनं केषांचिदेतन् मदमानकारणम् ।
स्थानं विविक्तं यमिनां विमुक्तये कामातुराणामतिकामकारणम् ॥२५०॥

तावन् महत्त्वं पाण्डित्यं कुलीनत्वं विवेकिता ।
यावज् ज्वलति नाङ्गेषु हतः पञ्चेषुपावकः ॥ २५१ ॥

---

249 { V } Om. in A F1 GVS2387 BORI329 Punjab2101 and NS2. Missing in Y7. — [a]) J जीर्णान्येव. C S (except X Y3; Y7 missing) मनोरथाश्च; Eot.v.2 °रथाः सु-; J °रथानि (for °रथाः स्व-). Est.4t.5t F4 I जातं; Ec व्यासं (for यातं). E2 H जरां; Eo.3–5 H3t जरा; I तथा; J1 न तद्; G1 M1.2 तु तद् (for च तद्). — [b]) F4 हीनांगेषु. H1c.3 विंध्यफलतां; J2.3 वंद्यफलतां; X G1 M1–4 मे विफलतां. E3.4 I जाता; F2.4 प्राप्ता; J3 यात्रा- (for याता). D गुणैर्यैर्. — [c]) Ic किं युक्तिं; X व्यक्तं तत्; G5 युक्तं तत् (for किं युक्तं). H2 Y3 G3t M2 [अ]भ्युपैति; M3 [अ]प्युपैति. J2t.3 बलवत्-. Est कामः; F3 काले (for कालः). F2 हि सर्वं कृतं; F5 हि सर्वांतकृद्; X कृतेर्थैक्षमी; Y3 हि लोकांतकृत् (for कृतान्तोऽक्षमी). — [d]) B (B2 by corr.) J1t X2 Y4–6.8 T G1.4.5 M1–3 हा ज्ञातं (B2 m.v. न ज्ञातं); C मुक्त्वैकं; D नाज्ञातं; Eo.2.4 ह्याज्ञानं; E3 W2t.3.4 ह्यज्ञानं; F2 तज्ज्ञानं; F3 W1.2c न ध्यातं; F4 यज्ज्ञानं; F5 अज्ञातं; H I (orig.) J2 Y2 ह्याज्ञातं; I (by corr.) नो ज्ञातं; X1 हाः सातं; Y1 G3 ह्यज्ञातं; Y3 भो ज्ञातं; G2 ह्यज्ञानान्; M4.5 हा ध्यातं (for आ ज्ञातं which is found in H1c.3c J1c.3). B C D F3.4m.v.5 H I मधुसूदना°; E F2.4 H1c.v.3c.v. J Y8 त्रिपुरांतका°. D E5 Y1.3 -युगुलं; H J1 -कमलं. C दीनस्य; D Eo.2 J3 मुक्तास्ति; F2 मुक्तेस्तु; J1t मुक्तासि; Y8 त्यक्त्वास्ति (for मुक्त्वास्ति). C कान्या (for नान्या).

BIS. 2425 (976) Bhartr̥. ed. Bohl. **3**. 83. Haeb. 78. lith. ed. II. 84, III. 70. Galan 81.

250 { V } Found in A C D E F4; BVB5 V 107 (extra) [Also GVS 2387 V 82; BORI 326 Ś 79; BORI 329 and Punjab 2101 V 73; BORI 328 V 97 (95); Jodhpur 3 V 95 (94); Punjab 697 V 90; Ujjain 6414 Ś 84; NS 1 V 98; NS 2 V 76 (75); NS 3 V 118 (extra).] — [a]) F4 (m.v. as in text) यासं (for ज्ञानं). D ज्ञान- (for मान-). C -मदादिवारणं; F4t.v. -मदाविनाशनं; BVB5 °मदस्य नाशनं. — [b]) C भेतद् (for एतन्). — [d]) C D F4 अपि (for अति-).

BIS. 2450 (4089) Bhartr̥. lith. ed. II. **3**. 83; SS. **14**. 16.

251* { Ś } Om. in BORI 329 GVS 2387 and Adyar XXIX-E-2. Y2 missing. — [b]) B1 F2 कुलिनत्वं; Eo.1.5 X1.2c Y1 विवेकत्वं; G4 विवेकित्वं (for कुलीनत्वं). A2 B2 D E3 F2 H3t I J1c W1.2 X2t G1.5 M4 विवेकता; Eo.1.5 X1.2c Y1 G4 कुलीनता; J1t विवेकिनां; M3 विपाकता (for विवेकिता). — [c]) A2 कुलति (for ज्वलति). Eo X1t Y8 नागेषु (for नाङ्गेषु). — [d]) Ao.1 (by corr.).2.3c B2 D F1.3 H I X Y1 हृत; B1 F4 Y8 हुतः; F5 हुत-; W1 स्वतः; M3 हताः; M4.5 ततः (for हतः). A3 M4.5 -सायकः; M8 -पावकाः (for -पावकः).

तुङ्गं वेश्म सुताः सतामभिमताः संख्यातिगाः संपदः
कल्याणी दयिता वयश् च नवमित्यज्ञानमूढो जनः ।
मत्वा विश्वमनश्वरं निविशते संसारकारागृहे
संदृश्य क्षणभङ्गुरं तदखिलं धन्यस् तु संन्यस्यति ॥२५२॥

तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि
क्षुधार्तः सञ् शालीन् कवलयति मांसादिवलितान् ।
प्रदीप्ते रागाग्नौ सुदृढतरमाश्लिष्यति वधूं
प्रतीकारो व्याधेः सुखमिति विपर्यस्यति जनः ॥ २५३ ॥

त्रैलोक्याधिपतित्वमेव विरसं यस्मिन् महाशासने
तल् लब्ध्वाशनवस्त्रमानघटने भोगे रतिं मा कृथाः ।

BIS. 2553 (1030) Bhartṛ. ed. Bohl. **1**. 61. Haeb. 64. lith. ed. **II**. **52**. Śatakāv. 70; SRB. p. 166. 594; SHV. app. 1. f. 11b. 22; SM. 1376; SN. 246; SLP. **4**. 94 (Bh.).

252 {V} Found in **S** [Also ISM Kaḷamkar 195 V 19; Punjab 2885 V 19; NS 3 V 20.] — ^{a}) G_4 M_4 संख्याधिकाः; $M_{3.5}$ संख्याधिगाः. — ^{b}) Y_3 वनिता (for दयिता). X G_4 $M_{4.5}$ वपुश्च; Y_7 पयश्च (for वयश्च). — ^{c}) W_3t $Y_{2.3}$ अनीश्वरं. X_2 Y_1 $G_{2.3}$ निवसते. — ^{d}) W_4 संदृश्यं. $W_{1.2}$ त्वदखिलं; $Y_{1.5.6}$ $G_{2.3}$ सुखमिदं; Y_2 तदितरं (for तदखिलं). X_2 धन्यास्तु; Y_3 धीरस्तु. X T_3 संन्यस्यते; Y_3 स न्यस्यति.

BIS. 2578 (1039) Bhartṛ. ed. Bohl. **3**. 21. Haeb. and Galan 18. lith. ed. I. 19; SSD. **4**. f. 23a.

253 {V} Om. in F_1 W NS 1.2. — ^{a}) D तृष्णा तुष्य (om. from त्यास्ये up to सञ्क्षा in ^{b}); F_5 तृषार्तः सन्प्राणी; J_1 तृष्णा शुष्यत्यास्ये; X पिपासुश्चेत्कश्चित्; G_5 मृषा शुष्यत्यास्ये (for तृषा शुष्य°). $A_{1.2}$ C $E_{0.5}$ शलिलं. A_0t B_2 E_3 स्वादु सुरभिः; C F_4t.v. J $M_{4.5}$ शीतसुरभि (J_1 °भिः); X Y T G M_{1-3} शीतमधुरं. — ^{b}) J_1t क्षुधार्थं; $J_{1c.2t}$ क्षुधार्थः. D F_5 $Y_{1.5}$ $T_{2.3}$ $M_{3.4}$ सञ्शालिं; $J_{1.2c}$ $Y_{2.6.8}$ T_1 $G_{4.5}$ $M_{1.2}$ शाल्यन्नं; $J_{2t.3}$ सः शाल्यं; Y_3 $G_{1.2}$ सञ्शालीं. Y_4 सञ्शाकं; Y_7 सञ्खारिं. E_5t कुवलयति. A E H F_4t.v. I J_1 शाकादिवलितान्; B मांसाकव°; C मांसेन कलितान्; D साम्राज्यकलितान्; F_2 सस्यादिफलितान्; F_3 शाकादिफलतः; F_5 X_1 $Y_{1.4-8}$ T G_{2-5} M_3 मांसादिकलितं (X_1 °तान्); $J_{2.3}$ चान्नं कवलितं; X_2 सूपादिकलितान्; Y_2 माषादिकलितं; Y_8 मांसाज्यकलितां; G_1 $M_{1.2.4}$ शाकादिकलितं; M_5 शाकाद्यनुगतान्. — ^{c}) D F_4t.v.$_5$ **S** (except G_5; W om.) कामाग्नौ; J_1 मारागनौ (com. मारागनौ = कामरोगाग्नि). C घननिबिडम्; E_0t सुहृदतरम्. **S** (except X_1 Y_8 G_5; W om.) आलिंगति (for आश्लिष्यति). C वधूः; X_1 वधुं. — ^{d}) H J $G_{2.3}$ प्रतीकारे; F_4 Y T $G_{1.4.5}$ M °कारं. $E_{0.3-5}$ $F_{2.3.5}$ I J_1 X $Y_{1.2.4.6.7}$ $G_{2.3}$ सुखमिव. E_5 विपर्यस्यति बुधः; G_1 $M_{1-3.5}$ विपर्येति कुजनः.

BIS. 2596 (1050) Bhartṛ. lith. ed. I. **3**. 95, II. 85. Schiefner and Weber p. 25; Śp. 4148; SRB. p. 371. 131; SBH. 3387; SKM. **131**. 72 (Bhaṭṭajayanta); SM. 1446; SSD. **4**. f. 18a; SSV. 1431.

254 {V} Found generally in **N**; omitted in **S** (but Śṛngeri 309 V 70), BORI 329, Punjab 2101, and NS 2; NS 3 V 116 (extra). This is often taken

भोगः कोऽपि स एक एव परमो नित्योदितो जृम्भते
यत्स्वादाद् विरसा भवन्ति विभवास् त्रैलोक्यराज्यादयः॥२५४॥

दददु दददु गालीर्गालिवन्तो भवन्तो
वयमपि तदभावाद् गालिदानेऽप्यशक्ताः ।
जगति विदितमेतद् दीयते विद्यमानं
दददु शशविषाणं ये महात्यागिनोऽपि ॥ २५५ ॥

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।
स्वानुभूत्यैकमानाय नमः शान्ताय तेजसे ॥ २५६ ॥

---

as an alternative to ब्रह्मेन्द्रादि (286). — [a]) F_1 °पतिस्त्वमेव. J_1 निरसं. J_{2t} °शासके; F_2 °शोभने (for °शासने). — [b]) B_2 तं लब्ध्वा; Eo.5 $F_{1.2}$ $H_{1c.3c}$ J_1 तल्लब्धा; J_3 तल्लब्धो. C नववस्तुमात्रघटने; F_5 परितोषमेषि च मनो (for [अ]शन...घटने). D E F_2 H_1 I J [आ]सन- (for [अ]शन-). — [c]) $F_{3.4}$ भोगैः (for भोगः). F_3 कायिक (for कोऽपि स). A E_5 एष; F_1 एव (for एक). F_3 भुवने (for परमो). D J_1 नित्योदिते; F_4 नित्योर्दिनो. Ao–2 जृंभितो; A_3 जृंभतो; Ec उज्जृंभते. — [d]) J_{2t} यत्सादाद्. Ao.3 विषया (for विरसा). Ao.3 विरसास्; $A_{1.2}$ Eo.3c4c.5 विषयास्; Est.4t वशगास्; F_2 भवतस् (for विभवास्). E_3 -राजादयः; F_2 J_{1t} -राज्योदयः.

BIS. Cf. ब्रह्मेन्दादि.

255 {V} Found in A B C D; F_1 V 113 (extra); F_4 V 29; F_5 V 28. [Also BORI 326 V 29 (28); BORI 329 and Punjab 2101 V 29; BORI 328 V 30; BU V 34; Jodhpur 3 V 29; Punjab 697 V 26; NS 1 V 34; NS 2 V 24 (23)]. — [a]) B ददत ददत. A_2 B_2 गालिर्; F_5 गालीं. C गालिमंतो. — [b]) B D F_{1}m.v. वयमिह. C [ऽ]समर्थाः; $F_{1.5}$ [ऽ]प्यसक्ताः (for ऽप्यशक्ताः). — [d]) A ददति (for ददतु). Aot शशि-विषाणां. A किं (for ये).

BIS. 2702 (1102) Bhartṛ. ed. Bohl. **3.** 99. Haeb. 97. Śatakāv. **110.** Subhāsh. 311; **SM** 1566; SN. 557; BPS. f. 25a. 155; SSV. 1538.

256 {V, N} Om. in D F_3, Punjab 697 and Punjab 2885. Added by later hand without number in Adyar XXIX-E-2. In J_1 and Ujjain 6414 N 1 and V1. Generally in V in **N** MSS., and in N in **S** MSS. In T_1 and other southernmost sources, this often appears as Niti 0. — [a]) Ao–2 E_{5c} F_4 Y_3 दिक्पालाद्यनव- (Ao.1 com.: दिक्पालादि कहतां लोकपालप्रमुखे); E_2 दिक्कालादिनव-; Y_7 दिक्कालर्यनव-; M_4 दिक्कालाद्यपरि-. J_3 Y_2 -छन्ना-. Ao–2 Eo.2.4c.5 [अ]नन्तविज्ञान°; F_2 Y_2 T_{1cv}. G_1 $M_{2.3}$ [आ]नंदचिन्मात्र°; J_1 (Niti) -चिन्मात्रानंद°. — [c]) Ao.2 B C Eo.3t F_1 H J_2 $Y_{1.4-6.8}$ T $G_{4.5}$ $M_{1.3}$ स्वानुभूत्येक-; It सानुभूत्यैक; Y_3 स्वानभूत्यैक-. F_4 m.v. -गम्याय; H_2 -नाथाय; W -साराय (W_{4t} -रूपाय); Gst -बोधाय (for -मानाय). — [d]) F_4 चेतसे; G_1 M_3 शंभवे (for तेजसे). Y_6 नमः सोमार्धमूर्तये.

BIS. 2789 (1152) Bhartṛ. ed. Bohl. lith. ed. I and Galan **2.** 1; **SBH.** (**Bh.**); Laghuyogavāsiṣṭhasāra **1.** 1 (with com. of Mahīdhara); cf. Laghuyogavāsiṣṭha of Abhinanda **6.** 1; also Yogavāsiṣṭha VI A. **13.** 12; SSD. **1.** f. 2b.

दिश वनहरिणीभ्यो वंशकाण्डस्थलीनां
कवलमुपलकोटिच्छिन्नमूलं कुशानाम् ।
शकयुवतिकपोलापाण्डुताम्बूलवल्ली-
दलमरुणनखाग्रैः पाटितं वा वधूभ्यः ॥ २५७ ॥

दुराराध्यः स्वामी तुरगचलचित्ताः क्षितिभुजो
वयं तु स्थूलेच्छा महति च पदे बद्धमनसः ।
जरा देहं मृत्युर्हरति सकलं जीवितमिदं
सखे नान्यच्छ्रेयो जगति विदुषोऽन्यत्र तपसः ॥ २५८ ॥

दुर्ग्राह्यं हृदयं यथैव वदनं यद्दर्पणान्तर्गतं
भावः पर्वतसूक्ष्ममार्गविषमः स्त्रीणां न विज्ञायते ।

---

257 {Ś} Om. in I W. — [a]) B_2 D $F_{1.2.4t.v.}$ -यदिवन-; E_{4t} -दिनवन-; X_1 दिशि वन-; X_2 दिशि दिशि; Y_3 दशवदन-; Y_7 विशवन-. Y_{4-8} T_1 $M_{1.2}$ -हरिणेभ्यो; M_3 -करिणीभ्यो. H_2 वांशकांड-; X शंसुशुक्ति-; Y_3 वंशकंड-. B_2 -स्थलानां; C $F_{4.5}$ H J X_2 $Y_{1.2.4-8}$ T G M -च्छवीनां; X_1 -छ्वीनां; Y_3 -स्थवीनां. — [b]) J_{1t} कुशलम्; Y_8 पटलम् (for कवलम्). D $F_{1.2.4tv.}$ -लभेयं (for -लकोटि-). F_4 X छन्न- (for -च्छिन्न-). — [c]) A B_{2t} C D E F H X Y_7 G_4 शुकयुवति-; J युवतिजन-; Y_1 वरयुवति-; Y_2 शरयुवति-; X_8 उत युवति-; $M_{4.5}$ अपि मधुर- (for शकयुवति-). [B com. शक जे यवन तेहनि स्त्री]. $M_{4.5}$ -मुखीभ्यः (for -कपोला-). — [d]) F_1 -नखाग्रे. J_1 स्फाटितं. F_2 व्यावधूभ्यः.

BIS. 2809 (1161). Bhartṛ. in Schiefner and Weber p. 22. Cf. Sāhityamīmāṁsā (p. 141) 7. quoting "शकयुवतिकपोलापाण्डुने." Also Kṣemendra's Aucityavicāra-carcā (KM 1, p. 142) "कीरीकपोलतलकान्ततनुः शशाङ्कः." Also Kāvyānuśāsana of Vāgbhaṭa (KM 43, p. 5) "किं चेदानीं यवनतरुणीपाण्डुगण्डस्थलीभ्यः कान्तिः स्तोकं रचयति पदं नागवल्लीदलेषु ॥"; SLP. 4. 63 (Bh.).

258 {V} Om. in J. — [a]) C $W_{1c.2c.3c.4}$ X Y T G M दुराराध्याश्चामी. F_2 -बल- (for -चल-). W_{1t} क्षितिभृता; X Y_7 क्षितिभृतो. — [b]) C S च (for तु). C $F_{2.3.5}$ H W_{1-3} X $Y_{1.3-8}$ (Y_7 om.) T G M सुमहति (for महति च). $Y_{2.4-6.8}$ $T_{1.3}$ $G_{2.3.5}$ M_3 फले; T_2 भवे (for पदे). C F_5 Wc Y_3 दत्त-; $F_{1.3}$ ब्रह्म- (for बद्ध-). — [c]) W_{1t} Y_3 देहे. C $F_{1.3.4}$ H W_{1t} X Y (except Y_2) T G M दयितं; E_{2t} शकलं; F_2 यदिदं. A_3 Wc अपि; F_2 हर्म्यं (for इदं). — [d]) E_2 शखे; G_4 सुखे (for सखे). G_{2t} जयति (for जगति). F_1 विदुषो नात्र; F_2 विदुषो यत्र; $W_{2t.3t.4t}$ विदुषामत्र. F_5 तपसा.

BIS. 2389 (1175) Bhartṛ. ed. Bohl. 3. 78. Haeb. and lith. ed. III. 75, lith. ed. I. 77. Galan 71; SSD. 4. f. 26b.

259 {N} Found generally in N; F_4 N49 and 77. Om. in S. — [a]) C E Io अग्राह्यं; It आग्राह्यं. J_2 वदनं (for हृदयं). B_2 C E_{3t} F (F_4 second time) तथैव; J_1 तदेव (for यथैव). B_1 H I सद्-; $F_{1.2}$ तद्- (for यद्-). E_{3t} F_{1-4} -स्थितं (for -गतं). — [b]) F_{1-4} J_1 -दुर्गमार्ग-; $J_{2.3}$ -मार्गदुर्ग- (for -सूक्ष्ममार्ग-). — [c]) J_2 ज्ञातं दुष्कर-. B C

चित्तं पुष्करपत्रतोयतरलं विद्वद्भिराशङ्कितं
नारी नाम विषाङ्कुरैरिव लता दोषैः समं वर्धिता ॥ २५९ ॥

दूरादर्थं घटयति नवं दूरतश् चापशब्दं
त्यक्त्वा भूयो भवति निरतः सत्कथापादनेषु ।
मन्दं मन्दं रचयति पदं लोकचित्तानुवृत्त्या
कामं मन्त्री कविरिव सदा खेदभारैरमुक्तः ॥ २६० ॥

दैवेन प्रभुणा स्वयं जगति यद् यस्य प्रमाणीकृतं
तत् तस्योपनयेन् मनागपि महान् नैवाश्रयः कारणम् ।
सर्वाशापरिपूरके जलधरे वर्षत्यपि प्रत्यहं
सूक्ष्मा एव पतन्ति चातकमुखे द्वित्राः पयोबिन्दवः ॥२६१॥

धिक् तस्य मन्दमनसः कुकवेः कवित्वं
यः स्त्रीमुखं च शशिनं च समीकरोति ।

$E_{0.2.4.5}$ -चपलं (for -तरलं). B C E F H_1 आशंसितं (C °शंसिता; E_2 °शंशितं; E_8 °संशितं). — [d]) J_8 विषलतां and वर्धितां. $F_{1.2}$ नारी नाम नरस्य मोहनलता स्वर्गाग्रमार्गार्गला.

BIS. 75 (21) Bhartṛ. ed. Bohl. extra 15. Haeb. 2. 50; SRB. p. 350. 76; SN. 269.

260 {N} Found generally in N (J_2 corrupt) and om. in S. — [a]) J_2 दूराद्धनमर्थं. A_2 नवां; $E_{6}t$ भवं; F_3 च परं; F_4 न वा; F_5 न तं; J_2 om. (for नवं). F_8 -शब्दः; F_4 -शब्दांस् (for -शब्दं). — [b]) A_3 J_2 त्यक्ता; E (except E_3t) कृत्वा. C संमतापादनेषु; D सत्स्वभारंजनेषु; E $F_{3.4}$ I सत्सभापादनेषु; F_1 सत्पथापादनेषु; $F_{2.5}$ सत्यभारं जनेषु; $J_{1.3}$ सत्त्वभावो धनेषु; J_2 सत्त्वं चाभावोदयेषु. — [c]) F_5 चरयति (for रचयति). C °चित्तेनु° (for °चित्तानु°). — [d]) F_8 कामं कामं; J कार्यं मंत्री (for कामं मन्त्री). A_8 कविरपि. C खेदयुक्तैरयुक्तः; D खेदभावैरमुक्तः; J_3 भेदभावैरमुक्तः.

BIS. 2911 (1215) Bhartṛ. ed. Bohl. 3. 18. Haeb. 2. 102. Subhāsh. 316; SRB. p. 142. 31; SN. 844.

261 {N} Om. in W M_2, NS3. — [a]) J H_3 देवेन. A H सदा; G_4 [अ]न्वहं (for स्वयं). F_8 जयति यद्; G_1 M_3 जगदिदं (for जगति यद्). Y_7 प्रमाणे कृतं. — [b]) F_5 G_3t °शमेन्; X_2 Y_8 °नयन्; $Y_{2.7}$ °गमेन्; $Y_{4-6.8}$ T $G_{1.2c.3.5}$ °नमेन्; G_4 $M_{4.5}$ गमे; M_8 °रमेन् (for °नयेन्). E (except E_3) मदान्; J_1 महा; G_1 M_3 तथा; G_4 महन् (for महान्). C नैवात्र यत्; J_8 एवाश्रमः; $Y_{2.7}$ नैवाश्रयं; M_4 नेवाश्रयः. — [c]) E_3 °पूजके; F_4 °पूरिते; J_2 °हारके; Y_2 °पूर्तके (for °पूरके).

BIS. 2980 (1255) Bhartṛ. ed. Bohl. 2. 90. Haeb. 103. Subhāsh. 316; SRB. p. 95. 123; SN. 805; SSD. 4. f. 3b.

262 {Ś} Found in A E_2 (Ś 106, 108 extra) H. [Also C_2 Ś62; E_8 and Baroda 1781 (Ś106, 108 extra); BVB2 Ś59 (58); Ujjain 6414 Ś60; NS3

भ्रूभङ्गवीक्षणकटाक्षविलोकितानि
  कोपप्रसादहसितानि कुतः शशाङ्के ॥ २६२ ॥

न संसारोत्पन्नं चरितमनुपश्यामि कुशलं
  विपाकः पुण्यानां जनयति भयं मे विमृशतः ।
महद्भिः पुण्यौघैश् चिरपरिगृहीताश् च विषया
  महान्तो जायन्ते व्यसनमिव दातुं विषयिणाम् ॥ २६३ ॥

नायं ते समयो रहस्यमधुना निद्राति नाथो यदि
  स्थित्वा द्रक्ष्यति कुप्यति प्रभुरिति द्वारेषु येषां वचः ।
चेतस् तानपहाय याहि भवनं देवस्य विश्वेशितुर्
  निर्दौवारिक निर्दयोक्त्यपरुषं निःसीमशर्मप्रदम् ॥ २६४ ॥

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
  लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।

Ś58 (59).] — [b]) E_2 यत् (for यः). A_{0-2} शशिनश्च. A समं करोति. — [c]) E_2 भ्रूक्षेपसस्मित-; H भ्रूक्षेपविस्मित-. E_2 H_3 -निरीक्षितानि; $H_{1.2}$ -निरीक्षणानि (for -विलोकितानि). — [d]) E_2 °हसितं च (for °तानि). $H_{1.2}$ कुतश्च चंद्रे.

BIS. 3149. Subhāsh. 14; Śp. 3323 (Śrīdhanadadeva); SRB. p. 262. 188; SBH. 1977; SRK. p. 278. 4 (Sphuṭaśloka); Kavīndravacanasamuccaya 246; SHV. app. II. f. 8b. 85 (Dhanada); SK. 5. 155; ꣲU. 276; SL. f. 3b; SLP. 4. 14.

263 {V} Om. in C X. GVS 2387 Ś extra 3, and V6. — [c]) B_2 D E_2 I पुण्योघैश्. W चिरमपि (for चिरपरि-). G_1 $M_{1.2.4}$ °ता हि; I (by corr.) °तार्थे° (for °ताश्च). — [d]) G_1 Y_7 महन्तो. $Y_{2.3}$ इह; G_1 M अपि (for इव). A हातुं; F_3 जेतुं; J_{2t} धातुं; G_{3t} दातुर्. $E_{3t\,4}$ (m.v. as in text) व्यसनिनां; Y_8 विषविनां.

BIS. 3476 (1484) Bhartṛ. ed. Bohl. Haeb. lith. ed, I and II, and Galan 3. 3; SRB. p. 368. 43; SBH. 3455 (Bh.); SSD. 4. f. 8b.

264 {V} Found in C D E F_{3-5}; BU V 41 [Also ISM Kaḷamkar 195 V 63 (65); BORI 328 V 108 (106); Wai 2 V 34; Jodhpur 3 V 103 (102); NS 3 V 52 and V 97]. — [a]) C नायातः (for नायं ते). C निद्राति नाथापि हि; F_3 निद्रा न बाधो न हि; F_5 BU निद्राति नाथो न हि. — [b]) D $E_{2.4.5}$ द्रक्षति; F_3 दृप्यति; F_4 BU द्रक्ष्यसि (for द्रक्ष्यति). F_5 पाल्यति; BU पाल्यसि (for कुप्यति). F_5 ये मां (for येषां). — [c]) E_5 ते च स्थानपहाय. E_2 पाहि (for याहि). C पदवीं (for भवनं). F_3 वै सेवितुं; F_4 विश्वप्रभोर् (for विश्वेशितुर्). — [d]) F_5 BU नो दौवारिक-. C -निर्भयोक्ति-; D F_{3-5} BU -निर्दयोक्ति- (for -निर्दयोक्त्य-). F_4 -पुरुषं (for -परुषं). C °संवित्पदं; E_0 °शर्मप्रदः; F_3 °संपत्प्रदं.

BIS. 3612 (1550) Bhartṛ. in Schiefner and Weber p. 23. lith. ed. II. 3. 40.

265 {N} Om. in X Y_1 $G_{2.3.5}$, Goa, Adyar XXII-B-10, and Mysore 1642. Found in GVS 2387 twice as N 11 and N 24. — [a]) F_3 निंदंति. C अथ (for यदि).

अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥ २६५ ॥

नो चिन्तामणयो न कल्पतरवो नाष्टौ महासिद्धयस्
तावद् देहवशाः परोपकृतये नास्माभिरप्यर्जिताः ।
नेदं मज्जति मानसं च चपलं ब्रह्मामृताम्भोनिधौ
धिग् धिक् कर्मकुटीमिमां तदपि न त्यक्तुं वयं शक्नुमः ॥ २६६ ॥

परिभ्रमसि किं वृथा क्वचन चित्त विश्राम्यतां
स्वयं भवति यद् यथा भवति तत् तथा नान्यथा ।
अतीतमननुस्मरन्नपि च भाव्यसंकल्पयन्
अतर्कितगमागमाननुभवामि भोगानहम् ॥ २६७ ॥

J_{1t} स्तुवंति. — [b]) A_3 Y_8 लक्ष्मी. C परापततु; Y_7 समादिशतु. B_3 $E_{0-2,5}$ I_c $M_{1,3,5}$ यथेच्छं. — [c]) W_{2-4} मरणमेव. — [d]) A_2 B C E_5 F_4 $J_{2,8}$ M_3 न्यायात्पथः; J_{1t} न्यायात्पदं; M_5 मार्यास्त्वतः (for न्याय्यात् पथः). A_2 E_{1t} प्रतिचलंति; J_8 (by corr.) G_1 $M_{1,2}$ प्रचलयंति. C न धीरसत्त्वाः; G_4 पदान्न धीराः.

BIS. 3723 (1581) Bhartr. ed. Bohl. 2. 81. Haeb. 10. lith. ed. I and III. 82. Galan 87. Saṁskṛtapaṭhopa. 62. Subhāsh. 61, 303; Śp. 225 (Bh.); SRB. p. 78. 11 (Bh.); SBH. 278; SRH. 28. 12 (Bh.); SRK. p. 50. 2 (Prasaṅgaratnāvali); Alaṁkāraratnākara 471; ST 2. 1 (Bh.); SA. 24. 119; SHV. f. 47a. 342 (Bh.); SU. 1447; PT. 1. 39; SSD. 2. f. 99a; SMV. 28. 22; JSV. 173. 4; SKG. f. 17b.

266 {V} Found in A D E_3 (V extra 5); E_4 (V114 = 113, extra); $F_{1,2}$ (V113); BVB5 V 175 (extra). [Also BORI 329 and Punjab 2101 V 96; GVS 2387 V 111; BORI 328 V 125 (128); RASB G 7747 V 110 (113); Punjab 697 V118]. — [a]) $F_{1,2}$ नोष्टौ (for नाष्टौ). — [b]) D $F_{1,2}$ °वशात्. D $E_{3,4}$ $F_{1,2}$ °कृतयो (for °कृतये). D अभ्युज्झिताः; $F_{1,2}$ अप्यार्जिताः. — [c]) $F_{1,2}$ परम- (for चपलं). — [d]) BVB5 कूर्मकुटीम्. D त्यक्तुं न शक्ता वयं.

SRB. p. 214. 75.

267 {V} Found only in S. — [a]) X_1 Y_7 मुदा; X_2 $Y_{1,2,4-6,8}$ T G_{2-5} सुधा; Y_8 युधा. X_2 विश्राम्यतां; Y_7 $M_{1-3,5}$ विश्रम्यतां. — [b]) G_1 $M_{1,2}$ यदा; M_8 यथा (for स्वयं). Y_{1B} (by corr.) भ्रमति (for the first भवति). Y_7 तत्तदा (for तत्तथा). — [c]) W Y_2 (orig.) अपि न स्मरन्; X G_4 अनुविस्मरन्; G_1 अपि संस्मरन्. $W_{2,4}$ भाग्यसंकल्पयन्; X बाध्यसंकल्पवत्. — [d]) X कुतर्कगमना- (for अतर्कितगमा-). $Y_{4-6,8}$ T $G_{4,5}$ -समागमान् (for -गमागमान्). W अनुभव स्वभोगानिह. Y_8 भोगाननं.

BIS. 3963 (1718) Bhartr. ed. Bohl. 3. 63. Haeb. and lith. ed. III. 61. lith. ed. I. 52. Galan 57; SBH. 3153 (Kṣemendra); SRK. p. 92, 9 (Sphuṭaśloka); SSD. 4. f. 30a.

पाणिं पात्रयतां निसर्गशुचिना भैक्षेण संतुष्यतां
यत्र क्वापि निषीदतां बहुतृणं विश्वं मुहुः पश्यताम् ।
अत्यागेऽपि तनोरखण्डपरमानन्दावबोधस्पृशाम्
अध्वा कोऽपि शिवप्रसादसुलभः संपत्स्यते योगिनाम् ॥ २६८ ॥

पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्ष्यमक्षय्यमन्नं
विस्तीर्णं वस्त्रमाशादशकमपमलं तल्पमस्वल्पमुर्वी ।
येषां निःसङ्गताङ्गीकरणपरिणतिः स्वात्मसंतोषिणस्ते
धन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्म निर्मूलयन्ति ॥ २६९ ॥

पातितोऽपि कराघातैरुत्पतत्येव कन्दुकः ।
प्रायेण साधुवृत्तानामस्थायिन्यो विपत्तयः ॥ २७० ॥

---

268 { V } Found only in **S** (missing in Y_7) [Also Punjab 2885 V89 (90).] — [a]) X_2 G_{3t} **पाणिः**; M_5 **पाणी**. $Y_{2.3}$ **शुचिनां**. $W_{2t.3t}$ X_2 Y_{1-3} $T_{2.3}$ $G_{1.2}$ **भैक्ष्येण**. — [b]) X_1 **निषादतां**; Y_8 **निषचतां**. — [c]) X_1 **आत्यागेपि**; Y_3 **आयोगेपि**. W Y_{2-5} $G_{3.5}$ **-स्पृहां** (G_3 °**हा**); T_3 **-स्पृशो**. — [d]) W **मर्त्यैः**; X_1 **लब्ध्वा**; X_2 **लब्धा**; Y_1 **मध्ये**; Y_3 $G_{2.3.5}$ **मत्वा**; T_3 **मद्वा**; G_1 **अद्धा**. W_1 °**सुलभां**; W_{2-4} $G_{1.2t}$ °**सुलभाः**; X °**सुलभे**. X **संपत्स्सते**; G_{2t} **संपद्यते**.

BIS. 4021 (1754) Bhartṛ. ed. Bohl. **3**. 91. Haeb. 52. lith. ed. I. **43**. Galan 85; SDK. **5**. 67.1 (p. 321, Nagnācārya); SSD. **4**. f. 25b.

269 { V } Om. in I J W and Harilal's lith. ed. Missing in Y_7. — [a]) X_2 **पाणेः**. M_3 **भ्रमणपतगता**. B_2 D $E_{0.2.4t}$ $F_{2.4}$ X_1 $Y_{1.4-6.8}$ T $G_{3.4}$ M **भैक्षम्**; H_{3t} **लब्ध-** (for **भैक्ष्यम्**). H_{3t} **भैषय्यम्**; X_1 **अप्येक्षम्** (for **अक्षय्यम्**). M_3 **अंगं** (for **अन्नं**). — [b]) A **-दशकमविकलं**; F_3 [उ]**दकमपि विमलं**; X **दशकमपतुलं**; $Y_{6.8}$ T_1 G_4 **-दशकमचपलं**; $T_{2.3}$ °**दशकमपरुषं**; G_5 **-धवलमपमलं**; $M_{4.5}$ **-दशकमलमलं**. Y_3 **तव्यम्** (for **तल्पम्**). Y_2 **आकल्पमुर्वी**; M_3 **अल्पं स्वमुर्वी**. — [c]) X Y_{1B} T_3 M_3 **एषां**; Y_3 **योषा-** (for **येषां**). X_1 **निःसंगिता-** (for **निःसङ्गता-**). F_2 -[**अं**]**तःकरणपरिणतिः** $F_{3.4}$ -[**अं**]**गीकरणपरिणति-**; X -[**अं**]**गीकरणपरिणता** (X_2 °**तान्**); $Y_{1.4-6.8}$ T G M_{1-3} -[**अं**]**गीकरणपरिणत-** ($T_{2.3}$ $G_{1.2}$ °**तः**); Y_2 [**अं**]**गीकरणपरिगत-**; $M_{4.5}$ -[**आ**]**लिंगनसुखमतुलं**. B $F_{4m.v.}$ H X_2 Y_{1-6} T G M **स्वांत-** (for **स्वात्म-**). — [d]) B °**निरताः** ($B_{2t.v.}$ as in text). Y_3 **कर्ममन्मूलयंति**; T_2 **कर्म निर्मूलयंतः**; T_3 **कर्म निर्मूलयंती**; M_3 **कर्ममुन्मूलयंति**.

BIS. 4019 (1753) Bhartṛ. Galan **3**. 84. Nītisaṁk. **83**. Śāntiś. **4**. 7; **SRB** p. **371**. **113**; SSD. **4**. f. 25a.

270 { V } Cf. 276. Om. in X Y T G M (but Y_3 N IX-4) and Harilal's lith. ed. — [a]) J_1 W_1 **पतितोपि**. B_1 **पराघातैर्**. — [b]) B_1 **हत्यनत्येव**; E_5 **उत्पतत्यैव**; W_1 (by corr:) **उत्पतत्यैव**. W_2 **कंदुकः**. — [c]) D **साधुवृत्तीनां**; E_{2t} F_{1-4} $H_{1t.2.3t}$ **हि सुवृत्तानाम्**. — [d]) C E_{0t} F_5 J_1 W_4 **आस्थायिन्यो**. C I **विभूतयः**.

BIS. 3886 (1685) Bhartṛ. ed. Bohl. **2**. 83. Haeb. 26. lith. ed. I and Galan **84**. Subhāsh. 195; Śp. 486; SRB. p. 45. 30; SBH. 222; SA. **24**. 117; SHV. app.

पान्थस्त्रीविरहानलाहुतिकथामातन्वती मञ्जरी
माकन्देषु पिकाङ्गनाभिरधुना सोत्कण्ठमालोक्यते ।
अप्येते नवपाटलापरिमलप्राग्भारपाटच्चरा
वान्ति क्लान्तिवितानतानवकृतः श्रीखण्डशैलानिलाः ॥ २७१ ॥

पुरा विद्वत्तासीदुपशमवतां क्लेशहतये
गता कालेनासौ विषयसुखसिद्ध्यै विषयिणाम् ।
इदानीं तु प्रेक्ष्य क्षितितलभुजः शास्त्रविमुखान्
अहो कष्टं सापि प्रतिदिनमधोऽधः प्रविशति ॥ २७२ ॥

प्रणयमधुराः प्रेमोद्गाढा रसादलसास् तथा
भणितिमधुरा मुग्धप्रायाः प्रकाशितसंमदाः ।

I. fol. 8a. 24 (Śīlabhaṭṭārikā?): PT. **1**. 8; SSD. **2**. f. 126a; SSV.406; SKG. f. 17b.

271 {Ś} Om, in C J_1 and ISM Kaḷamkar 195. — [a]) D I नलद्युतिकथाम्; $F_{3.4}$ J_3 **S** (except X_1 G_4) °नलाहुतिकलाम् (X_2 °नलीहुतिकथाम्; Y_3 °नलावतिकलाम्); B_2 F_4m.v. H °नलद्युतिकलाम्. J_2 मंजरीं. — [b]) F_3 सा कंदेषु. B_1 हि कोकिलाभिरधुना; W_1 M_5 पिकांगनाभि(M_5 °नापि)मधुना. B_1 $E_{3.4}t$ $H_{1.3}$ (c.v. as in text) Y_1c.v. आलिंग्यते (for आलोक्यते). — [c]) T_1 अल्पास्ते; G_1 अस्येते; M_1 अ*ते (for अप्येते). $F_{2.3}$ X M_{3-5} नवपाटली-. W -परिमला; G_2 -परिमलाः; G_3 -परिमले (for -परिमल-). D -प्राग्भारपादाचरा; T_2 -प्राग्भारपाटश्चरा; G_1 प्रागज्जपापाटवा; G_3t -प्रोद्गारपाटच्चरा. — [d]) F_5 वाति (for वान्ति). $M_{2.4.5}$ श्रांति- (for क्लान्ति-). G_4 -वितानतानच-. B_2 F_3 G_4 -भृतः; W G_1 -कृताः (for कृतः). A श्रेखंड-; Y_3 $G_{1.2t.4}$ श्रीकंठ-. F_2 X_2 $M_{3.5}$ -शैलानिलः; F_3 -शैलानिला; Y_2 -शैलानलाः; G_1 -कंठानिलाः; G_2t शैलानिभाः.

BIS. 4050 (1769) Bhartṛ. ed. Bohl. and lith. ed. III. **1**. 36. Haeb. 39. lith. ed. II. 83; SLP. **5**. 20 (Bh.).

272 {V} Found in A C D E $F_{1.4}$ [Also Jodhpur 3, BORI 329, and Punjab 2101 V30; BORI 326 V35 (34); Punjab 697 V27; NS1 V35; NS2 V25 (24); NS3 V107 (extra)]. — [a]) C अमलिनधियां; D अपशमवतां; F_1 उपशमयतां. F_4 केशह्रद्ये. — [b]) C F_1 (orig.) विषयिनां; F_4 (by corr.) विषयिना. — [c]) C सं-; E_5 सा (for तु). A -विषमाम् (for -विमुखान्). — [d]) D कष्टं (for सापि).

BIS. 4143 (1802) Bhartṛ. ed. Bohl. **3**. 100. Haeb. 98. lith. ed. II. 27. Subhāsh. 311.

273 {Ś} Om. in D $M_{4.5}$, Mysore 582 (last three substitute मधुरमधुर) Adyar XXII-B-10. Wrongly om. in E_3. — [a]) B_2 Eot (by corr.) It Y_7 °मधुरा; Eot(orig.)$_{1.2}$ F_3 °मधुर-; H_3c Ic °विधुरा (for °मधुराः) [H com. gloss विह्वलाः]. A प्रेमप्रौढाः; B_1 E (E_3 missing) It X $Y_{1.2.6}$ प्रेमोद्गारा; $F_{3.5}$ W प्रेमोद्गाढ-; $Y_{5.8}$ T $G_{4.5}$ प्रेमोदारा; Y_7 प्रेमोद्गाडा. A प्रसादवशास्तथा; E_2t रसातलसस्तथा; F_4 रसाय यथा तथा; $H_1t.{}_{2.3}t$ प्रसादपदास्तथा; $H_1c.{}_3c$ प्रसन्नपदास्तथा; J_1t रसायनरसोदय वा तदा; $J_{10.2}$ रसो- (J_2 °सा°)दय वा तथा; $Y_{2.5}$ G_2 रसार्द्रयुतास्तथा (Y_2 °दा); Y_3 M_1 रसार्द्रत(M_1 °क)राः सुधा-;

प्रकृतिसुभगा विस्रम्भार्हाः स्मरोदयदायिनो
रहसि किमपि स्वैरालापा हरन्ति मृगीदृशाम् ॥ २७३ ॥
प्रथितः प्रणयवतीनां तावत् पदमातनोतु हृदि मानः ।
भवति न यावच्चन्दनतरुसुरभिर्मलयपवमानः ॥ २७४ ॥
प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः ।

$Y_{4.6}$ T रसाश्रयतां गताः; Y_7 रसाश्र यथा तथा; Y_8 रसोदयनिर्भरा; G_1 रसार्द्रं यथा तथा; G_3 रसैः कृतनिर्भरा; G_4 रसादयो यथा; G_5 रसाश्रयतां तथा; M_2 रसोदयधातवो; M_3 रसार्द्रंतया तथा (for रसादुल्लसास् तथा). — ^{b}) A B_2 C E (except Eot; E_3 missing) I F_3 X Y_1 भणित-; Eot W_{2-4} भणति-; $F_{1.2}$ रणित-; J_1t प्राणिति-; J_1c G_2 प्रणित-; W_1 Y_2 G_4 प्रणति-; Y_{4-7} $T_{2.3}$ फणिति-; T_1 पणिति- (for भणिति-). B_1 F_4 -चतुरा; M_3 -मधुना (for -मधुरा). C मुग्धाः प्रायः; E_2 F_3 J_1t Y_7 G_3 मुग्धा(G_3 ग्धाः)प्रायाः. B $H_{1c.3c}$ प्रकासित-. A $Y_{2.4}$ $G_{2.3}$ -मन्मथाः; Y_7 -नर्मदाः; W -प्रमदाः (W_1t °मुदाः); $G_{1.4}$ $M_{2.3}$ -संमताः (for -संमदाः). — ^{c}) F_3 -सुलभा; J_1t -शुभगा; G_2t -स्वभगा. A Y_7 विश्रंभार्याः; B_1 E It विश्रंभार्हाः; B_2 विख्यातार्थाः; C विस्रंभावर्थाः; F_3 विश्रंभार्याः (t.v. विस्रंभार्याः); F_4 विश्रब्धार्थाः; F_5 विश्रंभार्द्राः; H विश्रंभार्थाः (H_1t: विष्टं°); $H_{1c.v.3c.v.}$ Ic -[आ]विर्भूतार्थाः; J_1 विस्रंभार्द्र-; J_2 $Y_{2.4-6.8}$ T G M_{1-3} विस्रं(Y_2 °श्रं°)भार्द्राः; Y_3 विश्वंभार्द्राः (for विस्रम्भार्हाः). C °यायिनो (for दायिनो). — ^{d}) M_3 हरसि (for रहसि). B_1 न खलु; Y_1 M_3 कमपि (for किमपि). A B_2 Ic J_1 (gloss) स्वेच्छालापा; B_1 कंठालापा; H_2 $Y_{2.4.6}$ $G_{2.3}$ स्मेरालापा; W_1 स्वैरालापान्. C हरंत; F_5 रचंति; Y_7 दहंति; G_4 जयंति (for हरन्ति). H_1 W_{2-4} मृगदृशां; J_1t M_3 मृगीदृशः.

BIS. 4218 (1836) Bhartṛ. ed. Bohl. and lith. ed. III. **1**. 30. lith. ed. II. 56. Śatakāv. 65; SLP. **4**. 98 (Bh.).

274 {Ś} Om. in C J_1, Wai 2, Ujjain 6414, Nagpur 1087, BORI 326. *cd* missing in F_5. — ^{a}) D प्रथय-; Eot.1t I Y_7 T_3 प्रथित-; E_2t प्रायः; F_2 प्रथिताः; F_3 X प्रयतः; F_4 प्रथयति; J_2 पतितः; Y_6 दयितः; M_5 प्रथितं (for प्रथितः). G_1 प्रणयवनितानां. B_2 F_5 W प्रियपुरतो(B_2 °पुरुषो)युवतीनां; H प्रिये प्रणयकुपितानां. — ^{b}) $F_{1.3}$ तां तां (for तावत्). A_3 B E_3t F_4 (by corr.) $H_{1t.2.3t}$ X $Y_{1.3}$ पदमातनोति; $F_{1.3}$ मुदमातनोतु; $M_{4.5}$ स्थानं तनोति (for पदमातनोतु). M_5 मानं (for मानः). — ^{c}) E_5 न भवति; Y_8 वहति न (for भवति न). M_3 स्त्रीणां (for चन्दन-). X यावद्भवति न चंपा-. — ^{d}) M_3 चंदनतरु- (for तरु-). Eot-सुरति-; F_2 W_1 G_1 M_3-सुरभि-. Eot -निर्मलयपवमानः; E_2 G_1 -मलयपवनः; F_2 -मल्यपवनः. W_1 -मधुरनिर्मलः पवनाः; W_{2-4} -मधुनिर्मलः पवनः (W com. यावन्मलयानिलो न भवति).

BIS. 4347 (1916) Bhartṛ. ed. Bohl. **1**. 32. lith. ed. II. 91. Śatakāv. 65; SLP. **5**. 24 (Bh.).

275 {N} Om. in X Y_7. A later addition on a new fol. in Adyar XXIX–E-2. J_3 Y_2 order *acbd*. — ^{a}) Eo प्रधानं; J_1 प्रसादं (gloss = प्रसन्नत्वत्रु). Y_{1A} गृहमपगते. — ^{b}) J_3 कदनं. C F_4 W (W_1 doubtful) G_1 M_3 न (for च). F_2 [अ]प्यपकृतेः; $J_{1.3}$ [अ]प्युपकृते; Y_6 [अ]भ्युपगतेः. — ^{c}) B_1 अनुत्स्येको; E_3 F_4 अनुत्सेका; E_5c अनुच्छेदो; I Y_1 अनुच्छेको; Y_2 निरुत्सेको; G_1 $M_{2.3}$ अनुद्वेगो. A लक्ष्मीभिरनुभवसाराः; D लक्ष्म्या निरभिभवसागराः; E_2 F_4 लक्ष्मानि(F_4 °क्षि)रभिभवनीयाः; E_3t लक्ष्मणविभवसाराः; E_3o लक्ष्म्या निरभिभवनीयाः; F_3 लक्ष्म्या अतिविभव°; F_5 It लक्ष्म्यां(F_5 °क्ष्म्याः)चिरविभवसाराः(It °रा-); Ic लक्ष्म्या न रतिभवसारा-; J_2 Y_3 $T_{1.3}$ G_5 $M_{4.5}$ लक्ष्म्यां निरभिभवसाराः;

अनुत्सेको लक्ष्म्या निरभिभवसाराः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ २७५ ॥

प्रायः कन्दुकपातेनोत्पतत्यार्यः पतन्नपि ।
तथा त्वनार्यः पतति मृत्पिण्डपतनं यथा ॥ २७६ ॥

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य उत्तमगुणा न परित्यजन्ति ॥ २७७ ॥

$W_{1.2.4}$ लक्ष्म्यां(W_4 °क्ष्म्या)निरवधिभव°; W_3 लक्ष्म्यां विरतिभव°; $Y_{2.4.5}$ $G_{1.4}$ M_{1-8} लक्ष्म्यामनभिभवगंधाः ($G_{1.4}$ $M_{1.8}$ °वसाराः). $E_{1.5}$ G_3 -सारा; J_1 -सारः (for -साराः). E_1 I G_8 पर(J ऽपर)कथा. — d) J_1 केनोद्दिष्टं. D °रावृत्तमिदं; E_2 J_3 रावृतमिदं. $Y_{2.4.6}$ श्रुतेस्यंतासक्तिः पुरुषमभिजातं कथयति (Y_5 °सि).

BIS. 4253 (1859) Bhartṛ. ed. Bohl. **2**. 54. Haeb. 79. lith. ed. I. 63, II. 64; Galan 67. Kuvalayānanda 140; SRB. p. 52. 249; SBH. 281; SRH. **168**. 39. SRK. p. 15. 40 and p. 21. 102 (ST.); PT. **1**. 55; SSD. **2**. f. 93a.

276 } N } Cf. 270. Om. in W, Punjab 2885, BORI 326. — a) F_1 $Y_{3.7}$ G_2 दैवात्; $T_{1.2}$ G_1 M यथा (for प्रायः). X_1 G_2 M_2 कंतुक-. B_2 -घातेन (for -पातेन). J_1 रयात्कंतुकतः पाताद्; J_2 रयात्तु कंदुकः पाताद्; J_3 रयात्कंतुकवत्तूर्णं; $Y_{2.4.5.8}$ T_3 $G_{3.5}$ दैवात्कंदु(Y_2 $G_{3.5}$ °तु)कवन्नूनं; Y_6 G_1 दैवात्कंदुकवत्तूर्णम्. — b) D Eot. it. 5t F_1 X Y_7 M_2 पतति; J $Y_{2.4-6.8}$ T_3 $G_{4.5}$ उदेति; Y_1 $G_{2.8}$ न स्थायी (for [उ]त्पतति). — c) $A_{1.3}$ B_2 तथा तु; F_2 यथा तु; X_2 तत्वार्थ-. J_2 X_2 नार्यः (for [अ]नार्यः). — d) $A_{0.1.3}$ मृत्पिंडे; X_1. मृत्पिंडं. E3t -गुडिका; H1t -गुटिका (for -पतनं).

BIS. 4333 (1906) Bhartṛ. ed. Bohl. extra 14. Haeb. **2**. 27. Pañc. ed. Koseg II. 170. of. BIS. 5090. Subhāsh. 195 (varr.) SA. **24**. 117 (var.); SKG. f. 17b.

277 } N } Found only in **S** [Also Punjab 2885, N27; NS3 V112 (extra).] — a) M_8 आरभ्यते. X नीचा. — b) T_3 M_8 आरभ्य. W_2 X_1 Y_{1A} -विहिता; W_4 (by corr.) -चरिता; X_2 -पिहिता; Y_2 G_3 -निहिता; Y_3 -निरता; $Y_{4-6.8}$ T_1 $G_{2.4.5}$ M_3 -निहता (for -विहता). Y_7 [अ]पि रमंति. — c) X $Y_{1AB.2.3.8}$ T $G_{1.4}$ M_{1-3} मुहुर्मुहुर (for पुनः पुनर्). Y_3 प्रविहन्यमानाः; $M_{4.5}$ प्रतिहन्यमानं. — d) X_2 Y T G M प्रार(Y_{1B} °ल)ब्धम् (for प्रारभ्य). W Y_1 (printed ed.) °जना (for °गुणा). M_8 परित्यजंते.

BIS. 4342 (1913) Bhartṛ. ed. Bohl. **2**. 73. lith. ed. I. 26, lith. ed. II and Galan 27. Daśarūpāvaloka on 2. 1 (यथा वा भर्तृहरिशतके). Mudrārākṣasa 48 (II. 17). Pañc. III. 255. ed. Bomb. 177. Vet. in LA (III) 1; SBH. 544; SRH. **168**. 32 (Mudrārākṣasa); SS. **54**. 6; PT. **7**. 6; SSD. **2**. f. 99a; SSV. 383; JSV. **175**. 9.

प्रियसखि विपद्दण्डव्रातप्रपातपरंपरा-
    परिचयचले चिन्ताचक्रे निधाय विधिः खलः ।
मृदमिव बलात् पिण्डीकृत्य प्रगल्भकुलालवद्
    भ्रमयति मनो नो जानीमः किमत्र विधास्यति ॥ २७८ ॥

प्रीणाति यः सुचरितैः पितरं स पुत्रो
    यद् भर्तुरेव हितमिच्छति तत् कलत्रम् ।
तन् मित्रमापदि सुखे च समक्रियं यद्
    एतत् त्रयं जगति पुण्यकृतो लभन्ते ॥ २७९ ॥

प्रोद्यत्प्रौढप्रियङ्गुद्युतिभृति विदलत्कुन्दमाद्यद्विरेफे
    काले प्रालेयवातप्रबलविकसितोद्दाममन्दारदाम्नि ।

278 { V, N } Om. in C F_1 H W I $Y_{2.3}$, and BVB2, Jodhpur1, BORI 326, NS1. 2, Adyar XXVIII-M-56. NS3 V122 (extra), Śṛngeri 309 V99. — [a]) E_2 $J_{2.3}$ X Y_{4-8} $T_{1.2}$ $G_{1-3.5}$ M_{2-5} प्रियसख; T_3 प्रियनिज-. B $F_{4.5}$ -दंडप्रांत-; $E_{0.2.4c.5}$ -दंड-; F_3 X $Y_{1.4-8}$ T G M -दंडाघात- (X °घाताद्; G_1 °खात-) (for -दण्डव्रात-). B Y_8 M_5 -प्रभाव-; $E_{4c.5t}$ J_3 -प्रताप-; X -विघात-; Y_6 T_1 G_5 -प्रवात-; G_1 M_{1-3} -प्रघात-; G_4 -प्रतप्त- (for -प्रपात-). — [b]) G_{3t} -परिचल- (for -परिचय-). F_2 $Y_{4.5.8}$ T $G_{1.5}$ M -बले; F_5 -वते; X_2 -चलच्-; Y_7 -जले (for -चले). F_5 चिंतावक्रे. F_2 Y_{1t} विधाय; F_4 [ऽ]भिधाय; J_1 निराय³ (for निधाय). J_1 -सविधिः; J_{2t} निधिः (for विधिः). E_{3t} F_3 Y_3 खलु; F_2 J_1 किल; G_4 खलं. — [c]) F_3 च बलात् (for बलात्). G_1 बंधीकृत्य. T_3 प्रचंड- (for प्रगल्भ-). — [d]) D भ्रमयसि. B F_2 जनं; F_5 तनो (for मनो). A_2 G_4 विधास्यते; J_3 विधिनास्यति.

BIS. 4353 (1921) Bhartṛ. in Schiefner and Weber p. 25; Śp. 451 (Vijjakā); SRB. p. 93. 86 (Vijjakā); SBH. 3137. SHV. f. 64a. 667, 79b. 63 (Vijjakā).

279 { N } Om. in X. — [a]) $F_{1.3}$ J W Y_{6-8} T $G_{1.4}$ M यः प्रीणयेत्; Y_2 यः प्रीतयेत्. I Y_2 स्वचरितैः; It (by corr.) स धन्यो; J_3 सुपुत्रो (for स पुत्रो). — [b]) Y_2 सुखम् (for हितम्). — [c]) J_3 Y_8 यन्मित्रम्. $W_{2.4}$ सुखं च; T_2 सुखेपि. $A_{2.3}$ (both doubtful); B_1 समक्रियं स्याद्; $E_{0t.1t}$ समं क्रियं यद्; $H_{1t.2.3t}$ यदेकरूपं; J_3 G_1 M_3 समप्रियं यद् (J- तद्). Y_7 समक्रियं यदि; Y_8 G_{5t} समक्रियं तद्. — [d]) W_4 तत्तत्र्यं.

BIS· 4363 (1926) Bhartṛ. ed. Bohl. **2.** 58. lith. ed. I. 67, II. 68. Galan 70, Subhāsh. 306; SRB. p. 50. 92; SBH. 2929; SRH. **163.** 160. (Vallabha); SRK. p. 18. 74 (ST.) ST. **36.** 5; SA. **36.** 11 (order *cabd*). VS. 811; SHV. app. I. f. 11a. 13; SSD. **2.** f. 119b.

280 { Ś } Om. in W, and Harilal's lith. ed. Y_2 lost on missing fol. — [a]) E_{3t} प्रौद्यत्प्रौढ-; J_1 प्रौढप्रोद्य-; $G_{2.3}$ प्रोद्यद्गाढ-. F_2 -द्युतिद्युति-. B_2 सुरसं; D विगलत्-; F_2 J Y_7 G_1 $M_{1.2}$ विलसत्-; X $Y_{1.3-6.8}$ T G_{2-4} M_{3-5} विकसत्-. B_1 कुंकुमोद्यद्-; F_3 -कुंकुमाद्यं; $F_{3t.v.}$ -कुंकुमाढ्य-; F_4 -कुंकुमाद्यन्. F_2 द्विरेफं; X -द्विरेफा; G_{2t} -द्युरेफे. — [b]) D कालप्रालेय-. T_2 -वाता- (for -वात-). Y_8 प्रचलितललित-. A_{0-2} -प्रचुर-; $E_{0.1}$ (orig.).$_{2c.5}$ $F_{1.4}$ H J $Y_{1.4-6}$ T G M प्रचल-; F_5 -प्रचय- (for प्रबल-). J X $Y_{1.4-7}$ $T_{1.3}$ G M -विलसित-. C

येषां नो कण्ठलग्ना क्षणमपि तुहिनक्षोदरक्षा मृगाक्षी
तेषामायामयामा यमसदनसमा यामिनी याति यूनाम् ॥२८०॥

फलं स्वेच्छालभ्यं प्रतिवनमखेदं क्षितिरुहां
पयः स्थाने स्थाने शिशिरमधुरं पुण्यसरिताम् ।
मृदुस्पर्शा शय्या सुललितलतापल्लवमयी
सहन्ते संतापं तदपि धनिनां द्वारि कृपणाः ॥ २८१ ॥

बाले लीलामुकुलितममी मन्थरा दृष्टिपाताः
किं क्षिप्यन्ते विरम विरम व्यर्थ एष श्रमस् ते ।

---

lacuna; D $F_{1.3}$ J_1 X_1 -[उ]हार-; F_4 J_2 X_2 Y_{4-6} T G_5 M_5 -[उ]दार-. C -वाते; J_2 Y_{4-8} T $G_{1.2.4}$ M_{1-3} °धाम्नि; X_2 °दृम्नि; G_3t °दाम्ना. — [c]) E_5 J_2 Y_3 T_3 G_2 एषां. F_2 नौ; T_2 नः (for नो). C D $E_{0.1}$ $F_{4.5}$ I Y_3 $G_{4.5}$ [उ]त्कंठलग्ना; Y_1 G_2 कंठलग्नाः; M_3 कर्णलग्न-. D तुहिनं. A_3 -क्षोदशक्ता; B_1 D $E_{2.3}$ H X $Y_{1BC.4-6.8}$ T $G_{2.3.5}$ $M_{4.5}$ क्षोददक्षा; B_2 -क्षोदराक्षा; C -क्षोदरक्ता; F_3 -क्षोददाक्षा; F_5 -[उ]त्कंपिवक्षो; J_1 -क्षोदलक्षा; J_2 -क्षोदलक्ष्मा; Y_{1A} -क्षोददक्ष्या; Y_3 -क्षोदवक्षा; Y_7 -क्षोदरक्षी; G_4 -क्षोभदक्षा; M_1 -क्षोभरक्षा; M_3 क्षोदराक्षो. Y_1 $G_{2.3}$ मृगाक्ष्यस्; M_3 मृगाक्ष्या. — [d]) A_{0-2} मायामयीमा ($A_{0.1}$ com. मायामयी + इमा, इमा कहतां आ); A_3 आयातयामा; B_2 C आयातियामो; D F_{1-3} H I J_2 $Y_{3.7}$ T_2 G_{1-3} M आयामियामा; E_2t आयातियामा; F_4 आयातमाया; F_5 आयामनीयं; J_1 आयानियामा; X आयातयामैर्; Y_1 आयामि यामैर्. A_0t यमसदनगता; $A_0c._{1.2}$ °निभा. J_2 G_1 M_{1-4} यातु. B_1 D G_1 $M_{1.2}$ नूनं (for यूनाम्).

BIS. 4366 (1928) Bhartṛ. Schiefner and Weber p. 23; Śp. 3924; SBH. 1843; SDK. **2.** 172. 3 (p. 181); SU. 889; SLP. **5.** 34 (Bh.).

281 {V} Found in **S** (except Śṛṅgeri 309). — [a]) W_4 श्वेच्छालभ्यं; M_5 चेच्छालभ्यं. $W_{3t.4c}$ प्रतिवचनखेदं; W_{3c} प्रतिवचममखेदं; Y_7 प्रतिभवमखेदं. — [b]) G_4 $M_{4.5}$ लभ्यं (for the second स्थाने). M_4 भाति शिशिरः; M_5 भवति शिशिरः (for शिशिरमधुरं). — [c]) Y_3 -तरा; G_4 M_5 -तला (for -लता-). Y_2 चंपकमयी. — [d]) Y_2 संलापं (for संतापं). W_1t ध्वनिनां (for धनिनां). X_1 कृपणः.

BIS. 4368 (1930) Bhartṛ. ed. Bohl. **3.** 28. Haeb. and Galan 25. lith. ed, I. 26; SRB. p. 72. 54; SKM. **128.** 3 (Kṛṣṇamiśra); SRK. p. 62. 9 (Bh.). Prabodhacandrodaya IV. 19; SHV. f. 77a. 871 (Kṛṣṇamiśra); BPB. 270; SSD. **2.** f. 137b.

282 {Ś, V} Om. in F_2 H I, ISM Kalamkar 195 and Mysore 582. NS3 Ś107 (108, extra). Occurs twice in D E; F_4 V72 (71), Ś19; GVS 2387 V3, 53; Punjab 697 Ś18 (19), V68. — [a]) A_0 -मुकिलितममी; B_1 X -विलसितममी; B_2 -विलसितमिमं; J_1t -मुकुलितमिमं; Y_7 G_1 मुकुलितवली. F_3 G_4 मंधरा; F_5 सुंदरी-; J Y_7 G_1 मंदरा-; $W_{1.3.4}$ सुंदरा. — [b]) B विरम विरस-. B_2 एक-; C एव (for एष). $W_{2t.4}$ समस्ते (for श्रमस् ते). — [c]) B C D E (Vai) $F_{13.5}$ J **S** (except X $M_{4.5}$) संप्रत्यन्ये; F_4 संप्रत्यंते. C वरम् (for वयम्). B अपगतं; C E_2 (Vai) उपगता; E_0t (Śr.) अपिरतं; $E_0c.$(Śr) and $Vai._{1.3}$(Śr.).$_5$ (Śr. and Vai c) अपरतं; X उपरता; G_4 अपि गतं; M_3 उपरतां (for उपरतं).

संप्रत्येते वयमुपरतं बाल्यमास्था वनान्ते
क्षीणो मोहस् तृणमिव जगज्जालमालोकयामः ॥ २८२ ॥

ब्रह्मज्ञानविवेकिनोऽमलधियः कुर्वन्त्यहो दुष्करं
यन् मुञ्चन्त्युपभोगभाञ्ज्यपि धनान्येकान्ततो निःस्पृहाः ।
न प्राप्तानि पुरा न संप्रति न च प्राप्तौ दृढप्रत्ययो
वाञ्छामात्रपरिग्रहाण्यपि परं त्यक्तुं न शक्ता वयम् ॥ २८३ ॥

ब्रह्माण्डमण्डलीमात्रं किं लोभाय मनस्विनः ।
शफरीस्फुरितेनाब्धेः क्षुब्धता जातु जायते ॥ २८४ ॥

Y3 अस्था वनांते; M5 आस्थापनं ते. — [d]) B ध्वस्तो; W1t क्षिप्तो; Y3 नष्टो; G4 क्षीणा- (for क्षीणो). G4 -मोदास् (for मोहस्). C जराजालाम्; G2t जगज्जातम्. C W2, 3t, 4 आलोकयामि; E2t (Śr.) आलोकयाम; F1 आलोचयामः.

BIS. 4444 (1966) Bhartṛ. ed. Bohl. 1. 93. Haeb. 96. Śatakāv. 75. SK. 7. 1; JSV. 304. 14.

283 {V} Om. in A E (E0 V111, extra; E2 and Baroda 1781 V110, extra), NS1. 2. NS3 V14 and V109 (extra). — [a]) G1 M1. 2 तत्त्वज्ञान-. J1t °किनो जडधियः; S °कनिर्मलधियः. J1 कुर्वंत हे. B E0. 2 H1. 2. 3c I दुःकरं. — [b]) Y2 उरुभोग- (for उपभोग-). D -भांजि विविधानि; E2 -कांचनधनान्; W1t -जान्यपि धनानि; X1 -आंत्यपि धनानि (sic); X2 -भात्यपि धनानि. D निस्पृहः; F1–3. 5 J2. 3 X Y1. 7 G3. 4 M निस्पृहाः. — [c]) D न प्राप्नोति; J2 W G2. 3 संप्राप्तानि; J3 न प्राप्तं*; Y1. 4–6. 8 T G1. 4. 5 M1. 2 संप्राप्ताश्च; Y2 संप्राप्ता न; Y3. 7 M3–5 संप्राप्तं न. W1. 2 नव- (for न च). C प्राप्तं; Y3 प्राप्ते; G1 प्राप्यां; M1. 4 प्राप्यान्; M2 प्राप्यं; M5 प्राप्ता (for प्राप्तौ). B1 J2. 3 W3. 4 Y1–3 M5 दृढप्रत्यया; B2 Y4–8 T G4. 5 M1. 2. 4 दृढप्रत्ययान्; C न च प्रत्ययं; E2 दृढः प्रत्यया; H F4 दृढः प्रत्ययो; G1 दृढप्रत्ययाद्. X संप्राप्तं न परित्यजंति न च कांक्षन्ति दृढप्रत्ययाः. — [d]) Y7 वांछामूत्र- (sic). H2 G3 -परिग्रहान्यपि; X2 Y1–6. 8 T G M परिग्रहानपि; X1 -परिग्रहार्थनपि Y7 -परिग्रहापि न. J W Y1–5. 7 G1–4 M परि-; X कथं (for परं).

BIS. 4491 (1991) Bhartṛ. ed. Bohl. 3. 14. Haeb. lith. ed. I. III and Galan 13, lith. ed. II. 96. Subhāsh. 317. Śāntiś. 1. 4 (Haeb. p. 410). SRB. p. 375. 224; SKM. 126. 17; SRK. p. 94. 2 (Kalpataru); SHV. f. 77b. 872; SU. 1033 (Bilhaṇa?); SM. 1095; SN. 291; SSD. 4. f. 7b; SSV. 1081.

284 {V} Om. in A F3 W, BORI 329, Punjab 2101, Punjab 697, Śṛngeri 309, NS2, BU114/7. Y7 missing. — [a]) I Y4–6. 8 T G5 M1. 4 ब्रह्मांडं; M3. 5 ब्रह्मंड-. T10.v. मंडलीभूतं. — [b]) C F5 X Y2. 3 M3 किं भोगाय; F2 भोगाय च; H J3 Y1 किं लाभाय; G3t किं लोकाय. M3. 4 मनस्विनां (M3 °ना). — [c]) E3t शबरी-. E2c X1 -स्फुरतेन; G3 M1. 2. 5 -क्षुभितेन; G2t -स्फुरितैर् (for -स्फुरितेन). F1 [अ]ब्धः; Y1. 2. 4–6. 8 T G2–5 M1 [अ]ब्धिः; M4. 5 [अ]ब्धौ. — [d]) F2 क्षुब्धमायातु; F4 क्षुब्धता किं प्र-; X1 क्षुब्धतां जातु; Y1. 2. 4–6. 8 T G4 M3 क्षुब्धो न खलु; Y3 G5 क्षुब्धता नैव; G1 क्षुब्धता किं न; G2. 3 क्षुब्धो जातु न; M1. 2 क्षुब्धता किं नु.

ब्रह्मा येन कुलालवन् नियमितो ब्रह्माण्डभाण्डोदरे
　　विष्णुर्येन दशावतारगहने क्षिप्तो महासंकटे ।
रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः
　　सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥ २८५ ॥

ब्रह्मेन्द्रादिमरुद्गणांस् तृणगणान् यत्र स्थितो मन्यते
　　यत्स्वादाद् विरसा भवन्ति विभवास् त्रैलोक्यराज्यादयः ।
बोधः कोऽपि स एक एव परमो नित्योदितो जृम्भते
　　भो साधो क्षणभङ्गुरे तदितरे भोगे रतिं मा कृथाः ॥ २८६ ॥

भवन्तो वेदान्तप्रणिहितधियामत्र गुरवो
　　विदग्धालापानां वयमपि कवीनामनुचराः ।

BIS. 4496 (1993) Bhartṛ. ed. Bohl. 3. 94. Haeb. and Galan 87. lith. ed. II. 76; Śp. 263 (Bh.); SRB. p. 79. 3 (Bh.); SBH. 495 (Bh.); SKM. 7. 1 (Bh.); ST. 43. 22 (Bh.); SK. 7. 22.

285 {N} Om. in X. — [b]) W_{3} -गहन- (for -गहने). E $F_{1.2.4}$ Ic H_{2} $W_{2.3}$ सदा; It तथा (for महा-). — [c]) Y_{1} शंभुर् (for रुद्रो). A °पाणिपिटके; C °पाणिरनिशं; G_{2}t °पात्रपुटके. C भिक्षाटने; $J_{1.2}$ M_{4} भिक्षाश(J_{2} °स)नं; Y_{2} भिक्षाटणं. $J_{1.3}$ $Y_{2.4-6}$ T G_{4} $M_{4.5}$ सेवते; J_{2} Y_{7} सेवितः; G_{1}t.v. कुर्वते; G_{2}t कार्यतः (for कारितः). — [d]) E_{1}t भ्रामति; M_{5} भ्रम्यति. C यद्दृशेन (for नित्यमेव). $Y_{6.7}$ गहने (for गगने).

BIS. 4497 (1994) Bhartṛ. ed. Bohl. and lith. ed. I. 2. 93. Haeb. 38. Galan 97. lith. ed. II. 95, III. 94. Aṣṭaratna 4 in Haeb. p. 8. Vikramacarita 261; Śp. 435 (Bh.); SRB. p. 93. 98 (Bh.); SBH. 3102; SRK. p. 76. 1 (Śp.); Garuḍamahāpurāṇa 113. 15; SS. 46. 7; SL. f. 39a; SN. 799; SSD. 4. f. 5a; SSV. 298; JSV. 262. 2.

286 {V} Cf. 254. Generally om. in N, found in S [Also NS3 V30; Punjab 2885 V39; ISM Kaḷamkar 195 V37]. — [a]) X Y_{1} G_{5} °लवान्; $Y_{2.3}$ °समान्; $Y_{4-6.8}$ T $G_{2.3}$ $M_{1-3.5}$ °कणान्; Y_{7} °कृतान् (for °गणान्). X_{1} Y_{3} मन्यसे. — [b]) W यच्छापाद्; X ये साक्षात्; Y_{2} यत्स्वादौ; Y_{3} यद्भोगाद्; Y_{7} यत्स्वाराड्; G_{4} यत्सोक्षात्- (for यत्स्वादाद्). X करुणोद्-; Y_{7} विरसी-; G_{4} -करणाद् (for विरसा). X_{1} वितथा; X_{2} वितपा; G_{4} विरसास् (for विभवास). — [c]) W बोधे; Y T $G_{2.3.5}$ $M_{1.2.4.5}$ भोगः (for बोधः). Y_{8} एष (for एक). — [d]) Y_{1} G_{1} $M_{1.2}$ हे (for भो). Y_{1} वृत्तिं वृथा; G_{1} $M_{1.2}$ भोगे मतिं; M_{5} भोगे शयी (for भोगे रतिं). Y_{2} मा कृथाः.

BIS. 4498 (1995) Bhartṛ. ed. Bohl. 3. 41. Haeb. and Galan 37. lith. ed. I. 38, II. 73; SSD. 4. f. 17b.

287* {Ś} This may be genuine. Cf. असाराः सन्त्वेते and discussion in Introduction. Om. in F_{3} H I J X Y, ISM Kaḷamkar 195, Ujjain 6414, and Wai 2. NS3 Ś104 (105, extra). F_{5} order *cdab*. — [a]) B_{1} वेदांते. A_{2} D E_{0} प्रणहित-. B_{1} -धिया (for -धियाम्). F_{5} W आस- (for अत्र). $F_{1.2}$ मुखरा (for गुरवो).

तथाप्येतद् ब्रूमो न हि परहितात् पुण्यमधिकं
न चास्मिन् संसारे कुवलयदृशो रम्यमपरम् ॥ २८७ ॥

भव्यं भुक्तं ततः किं कदशनमथ वा वासरान्ते ततः किं
कौपीनं वा ततः किं सितममलपटं पट्टवस्त्रं ततः किम् ।
एका भार्या ततः किं शतगुणगुणिता कोटिरेका ततः किम्
एको भ्रान्तस् ततः किं गजतुरगशतैर्वेष्टितो वा ततः किम्॥२८८॥

भिक्षाशी जनमध्यसङ्गरहितः स्वायत्तचेष्टः सदा
हानादानविविक्तमार्गनिरतः कश्चित् तपस्वी स्थितः ।

— b) C E विचित्रा- (for विदग्धा-). C इह (for अपि). — c) D F2 W1-3 भूमौ (for ब्रूमो). — d) C कुवलयदृशां. D रम्यमधिकम्. For cd, F5 reads तथाप्यन्तस्तत्त्वप्रणिहित-धियामप्यतिबलस्तदीयोनाख्येयः स्फुरति हृदये कोपि महिमा.

BIS. 4559 (2031) Bhartṛ. ed. Bohl. **1**. 52. Haeb. **55**. lith. ed. II. 15; SRB. p. 252. 48; Suvṛttatilaka of Kṣemendra (KM2, p. 52, Bh.); SHV. app. II. fol. 1b. 1 (Bh.); SLP. **4**. 65 (Bh.).

288 { V } Found in E (order *bdac* except in E5; E5 V extra 1) F1.2 V94; F3 (order *abdc*) V67, H and I. [Also GVS 2387 V116 (var.); BVB 2 V107; ISM Kaḷamkar195 V96 (99); BU V110 (108); Wai 2 V100; Jodhpur1 V64; Jodhpur3 V72; Punjab 697 V108; Ujjain 6414 V95 (96); BORI 328 V126 (20); NS3 V115]. — a) D भव्यं भूतां; E0 भुक्तं भुक्तं; E2-4 भक्तं भुक्तं; H भव्यं भक्तं. H कदशितम्. F3 I अशनं (for अथ वा). — b) E0.2-4 जीर्णा कंथा; I कोपीनं वा. D शितममलतरं; E5 सितममलपरं; F1.2 सितममलतरं; F3 सितममलमलं; H किमथ सितमहच; I सितमयममलं (for सितममलपटं). D E5 F3 पट्टकूलं; E0.2-4 पट्टसूत्रं; H चांबरं वा; I अंबरं वा. — c) E0 त्वेका; E5 एषा (for एका). E0 करितुरगगणैर्; E2-4 हयकरिसुगणैर्; F3 शतगुणमणिता; H1 शतगुणगणिता. E0.2-4 आवृतो वा (for कोटिरेका). — d) E5 एकं; H1 त्वेको (for एको). D भ्रातास्; F1.3 भ्रातस्; F2 भ्राता. H Ic करि- (for गज-). F3 I -रथैर् (for -शतैर्). E0.2-4 व्यक्तं ज्योतिर्न चांतर् (E4 वांतं) मथितभवभयं वैभवं वा ततः किं.

BIS. 2426 (4079) Bhartṛ. Schiefner and Weber p. 24. lith. ed. II. **3**. 67; SS. **55**. 3. SSD. **4**. f. 29b.

289 { V } Om. in A W, BORI329, Punjab2101 and NS2. Y7 missing. — a) B1 J1 X3 भिक्षासी. D -संगमेक-; F4 H -संगमध्य- (for -मध्यसङ्ग-). F5 G2.3 °चेष्टः सदा; J1 °चेष्टसदा; Y3 °चित्तस्पृहा- (for °चेष्टः सदा). — b) D lacuna; E F2.5 H3 I दानादान-; F1 हीनादान-; X T1 हानाहान-; Y3 M1.3 नानारूप-; M4 हारादान- (for हानादान-). E F4 I Y3.5.6.8 T1 G5 -विरक्त-; F1 Y1 (Y1B by corr.) -विरक्ति-; Y8 -विवक्त- (for -विविक्त-). C -वर्णरहितः; F3 -मार्गविरतः; J X Y2 -मार्गरहितः; Y8 -मार्गनिहतः. F3 मनस्वी (for तपस्वी). B कृती; F3 कृतः; X Y2.3 M3 जनः (for स्थितः). — c) F5 रथ्या- (for रथ्या-). C X Y (Y7 missing) T G1.4.5 M -कीर्णं-; D -शीर्णं-; F2.3 -जीर्णं- (for -क्षीण-). D I X Y1B (orig.).2 G1.3 M4.5 -विकीर्णं-; E2 -विस्तीर्णं-; F1 -किकीर्णं-; F3 J3 -विशीर्णं-; G3

रथ्याक्षीणविशीर्णजीर्णवसनैः संप्राप्तकन्थासखो
निर्मानो निरहंकृतिः शमसुखाभोगैकबद्धस्पृहः ॥ २८९ ॥

भिक्षाहारमदैन्यमप्रतिसुखं भीतिच्छिदं सर्वदा
339 { V } Found in D E F_4 V103 (102) [Also BORI 328 V105 (103); Jodhpur 3 V100 (99); NS3 V120 (extra).] — a) F_4 -वीचि- (for -नीवि-). — b) D सद्वृत्तिः; Eot सद्वृत्तां; E_5 सवृत्तं; E_0 सद्वृत्ते; F_4 सद्वृत्तिं. D E_4 F_5 तटविटप-; E_0 तटविटपि-; E_5 वटविटप-. — c) D F_4 को विद्वान्वित्तपित्तज्वरजनितरुजा तीव्रदुःखाधिकानां (F_4 °खासिकान्वे). — d) $E_{ot.4}$ वीक्ष्येत दुःस्थो E_2 वीक्ष्ये तदुत्थो. E_4 F_4 यदिहः D -चिंताम् (for -कम्पाम्).

340 { Ś } Om. in C. In F_5, missing or omitted. Not identified in Rāṇā Pratāp. trans. — a) Ao Eo -कुषम-. $A_{1.3}$ Eo केशर-; A_3 °केगर- (for °केसर-). — b)

मधुरमधुविधुरमधुपे मधौ भवेत् कस्य नोत्कण्ठा ॥ ३४० ॥

सिद्धाध्यासितकन्दरे हरवृषस्कन्धावगाढद्रुमे
गङ्गाधौतशिलातले हिमवतः स्थाने स्थितः श्रेयसि ।
कः कुर्वीत परप्रणाममलिनं मानं मनस्वी जनो
यद्युत्त्रस्तकुरङ्गशावनयना न स्युः स्मरास्त्रं स्त्रियः ॥ ३४१ ॥

सृजति तावदशेषगुणाकरं पुरुषरत्नमलंकरणं भुवः ।
तदपि तत् क्षणभङ्गि करोति चेदहह कष्टमपण्डितता विधेः ॥३४२॥

F3 H J1c.2 W Y T G3–5 M -भरामोद-; J1t G1 -भारामोद-; Xt -समूह- (but -भवामोद- in translation); G2 -भारमोद- (for -भवामोद-). — [c]) F1 °विधुरमधिपे; F4 °मत्तमधुपे; J1t °विधुरमधुसे; Xt °विबुध(but °निरत- in translation)मधुपे; M2.4.5 °मुखरमधुपे; (for °विधुरमधुपे). — [d]) Y8 भवति मधौ; Y4.5 मधुनि भवेत् (for मधौ भवेत्). Wt om. कस्य. E5t कस्यापि (for कस्य). Wt उत्कंठा; G1 नो कंठः (for नोत्कण्ठा).

BIS. 6965 (3224) Bhartṛ. ed. Bohl. 1. 37. Haeb. 40. lith. ed. II. 92. Kāvyas. 29. Śatakāv. 66; Śp. 3787 (Kapilarudra); SRB. p. 331. 9 (Kapilarudra); SBH. 1666 (Kapilarudraka); SLP. 5. 28 (Bh.).

341 {Ś} Om. in J. — [a]) A2 सिद्धाध्यासितकंदरे; X °ध्यासितकंधरे; Y3 °ध्यूषितकंदरे; E2 T2 हरि- (for हर). C H S (except W) °स्कंधावरुग्ण(G2t° दावरुग्ण-; G4 °धाविरुग्ण-) द्रुमे. — [b]) W2.4 °शिलांतले. C E3.4t F H I W X Y1.2.4–6.8 T G2.5 M1–3 स्थिते; D तपः-; E0.1.5 स्थितिं; G1 शुभे; G4 सिते; M4.5 स्थित- (for स्थितः). C D F3–5 W X Y1.4.7.8T G3t.5 श्रेयसि; F1 निश्चले; Y3 स्थेयसे; Y5.6 G4 M1.5 प्रेयसि (for स्थेयसि). — [c]) H3t के कुर्वीत. B C D E F H I S (except M3) शिरः प्रणाम(F1 °माण)मलिनं(F1.2.4 [t.v. as in text] H -विगलन्). B1 मान्यो; B2 C मान्यं; D Y8 मानी; F3 Y4–6.8 T (T1c.v. as in text) म्लानं (for मानं). B1 om. मनस्वी. — [d]) D F3.4t.v.5 H I (by corr.) X Y1.3–8 T G1.4 M1–3 यद्विन्नस्त-; F1.2.4 सद्यस्तत्र-; W1–3 यद्यत्रस्त-; W4 यद्यत्रस्तु G3t यद्यत्रस्थ-; M4.5 यद्यात्रस्त- (for यद्युत्त्रस्त-). B1 F3.4t.v. -शावकदृशो. Some N Mss and Y7 T G M read -शाव° (for -शाव°). B1 स्मरार्ताः; M3 स्मरास्त्राः (for °स्त्रं).

BIS. 7047 (3254) Bhartṛ. ed. Bohl. 1. 67. Haeb. 70. lith. ed. II. 12. Kāvyas. 59; SBH. 2244; SDK. 5. 57. 4 (p. 315); SLP. 4. 62. (Bh.).

342 {V, N} Om. in E (but E0 V114, extra; E2 V112, extra; E5 V116, extra), Jodhpur 1, Ujjain 6414, NS1. Y8 प्रक्षिप्तः. NS3 N111 (extra); BVB 5 V112 (extra); ISM Kalamkar 195 N100 (102), V121 (124). — [a]) X -गुणाकरः — [c]) E5 F4 J Y3 तदनु; W3 सदपि. E2 Y1.4.6 G1–3 M1–3 च क्षण-; W4 तक्षण-. E2 J3 -भंग (for -भङ्गि). — [d]) It खेदम् (for कष्टम्). J1 अखण्डितता. J2.3 कष्टतरा जडता.

BIS. 7163 (3289) Bhartṛ. ed. Bohl. 2. 88. lith. ed. I. 2. 90, 3. 93, II. 2. 92; Galan 93. Subhāsh. 68. Śp. 4000; SRB. p. 92. 67; SBH. 3126 (Phalguhastinī); SKM. 131. 39 (Phalguhastinī); SRH. 36. 4 (Phalguhastinī); SRK. p. 71. 15 (Bh.). SK. 6. 269; SSD. 4. f. 2a; SSV. 270; SMV. 15. 11.

स्थाल्यां वैडूर्यमय्यां पचति तिलखलं चान्दनैरिन्धनौघैः
सौवर्णैर्लाङ्गलाग्रैर्विलिखति वसुधामर्कमूलस्य हेतोः ।
छित्त्वा कर्पूरखण्डान् वृतिमिह कुरुते कोद्रवाणां समन्तात्
प्राप्येमां कर्मभूमिं न चरति मनुजो यस् तपो मन्दभाग्यः ॥ ३४३ ॥

स्थितिः पुण्येऽरण्ये सह परिचयो हन्त हरिणैः
फलैर्मेध्या वृत्तिः प्रतिनदि च तल्पानि दृषदः ।
इतीयं सामग्री भवति हरभक्तिं स्पृहयतां
वनं वा गेहं वा सदृशमुपशान्तैकमनसाम् ॥ ३४४ ॥

स्नात्वा गाङ्गैः पयोभिः शुचिकुसुमफलैरर्चयित्वा विभो त्वां
ध्येये ध्यानं निवेश्य क्षितिधरकुहरग्रावपर्यङ्कमूले ।

---

343 {N} Om. in A Y_2 NS1; Punjab 2101 N extra 2. — [a]) C F_{2-5} H_2 $W_{1.3}$ X_2 $Y_{4-6.8}$ T वैदूर्यमय्यां; X_1 वैडुर्यमय्या. C W_1 तिलकणांश्च; Eo F_5 X $Y_{8.7}$ (by corr.) तिलखलिं; F_4 $W_{2.4}$ तिलखलीं; $Y_{1A.1}$ तिलकणं; Y_{1BC} च लशुनं; G_1 M_{1-3} तिलगणं; G_2t तिलखिलं; $M_{4.5}$ तिलमलं (for तिलखलं). B D Eot. 1t.2.3.5 J W_1 X $G_{1.3}$ M चंदनैर्. B_2 D $F_{2.5}$ W_1 X_1 Y_1 इन्धनाद्यैः; E $F_{1.3}$ I J_2 Y_{8-6} T_1 G_{8-5} °नौघैः; G_2t इंदनोघैः. — [b]) B_2 लिंगलाग्रैर्; H_1 लांगलाग्र्यैर्; J_2 लांगुलाग्रैर्; W_1t लंगिलाग्रैर्; W_2t लोंगलाग्रैर्. E H_2 I J_1 W_2t X_2 Y_3 विलखति; T_2 विलिखत. D E_1t.3t.5t $F_{1.2}$ $H_{2.8}$ J $Y_{1AC.4-6.7}$ (orig.) T G M अर्कतूलस्य; F_5 अर्कमूल्यस्य; $W_{3C.4}$ X_2 Y_{1B} कर्ममूलस्य. — [c]) C भित्त्वा. B श्रीखंड- (for कर्पूर-). C -वृक्षान्; Eot.3 -खंडं; Y_4 $G_{2.3}$ -षंडान् (for -खण्डान्). E_2 वृतिहिम; J_3 G_5 वृतिमिव; X कृषिमिव; Y_1 कृषिमिह; M_3 वृतिरिह. C कोद्रवस्या-; J_2 कोद्रवीणां; W_1t कौद्रवाणां. — [d]) $E_{0-2.5}$ विचलति; J_1t रचयति; J_{10} न चरितः; $Y_{5.8}$ T G_4 न भजति. J_1 M_3 मंदभाग्याः.

BIS. 7226 (3311) Bhartṛ. ed. Bohl. and lith. ed. I 2. 98. lith. ed. II. 100, III. 99. Galan 104; SRB. p. 95. 127; SBH. 3045; SRK. p. 77. 10 (Bh.) SSD. 4. f. 26b.

344 {V} Found in A D E, F_4 V39 [Also BORI 329 V39; Punjab 2101 V38; BORI 328 and Jodhpur 3 V41; Punjab 697 V37; NS1 V44; NS2 V32 (31); NS3 V110 (extra).] — [a]) $E_{0.2-4}$ F_4 स्थितः; E_5t पुण्यारण्ये. F_4 परिवृतो. A_8 हि रणैः. — [b]) D मध्या; $E_{0.2}$ मेधा-; F_4 मूलैर् (for मेध्या). F_4 प्रतिदिनवदत्यापि दृषदः. — [c]) D हि विरक्तौ; F_4 (m.v. as in text) हरशक्तिं (for हरभक्तिं). E_5t स्पृहयति.

BIS. 7228 (5316) Bhartṛ. lith. ed. I. 3. 96, II. 33.

345 {V} Om. in A, F_1, BORI 329, Punjab 2101 and NS1.2. Missing in Y_7. — [a]) J_3 गंधैः (for गाङ्गैः). B (B_2 orig.) C -कुसुमजलैर्; X -कुसुमचयैर्; Y_8 -फलकुसुमैर्; G_4 -कुसुमशतैर्. D [अ]पि भो त्वां; F_2 विभोस्त्वां; G_1 निवेद्य; $M_{4.5}$ निवेद्यं (for विभो त्वां). — [b]) B H ध्यायन्निर्विश्य पश्यन् (H_3t तस्य); C J_2 ध्येयं ध्याने (J_2 °नं) निवेश्य; D क्वापि ध्यानं निवेश्य; E_2t.3t.4t F_2 ध्येये (E_3 °यं) ध्यानं नियोज्य (F_2 ज्यं); F_4

आत्मारामः फलाशी गुरुवचनरतस् त्वत्प्रसादात् स्मरारे
दुःखं मोक्ष्ये कदाहं समकरचरणे पुंसि सेवासमुत्थम् ॥ ३४५ ॥
स्पृहयति भुजयोरन्तरमायतकरवालकररुहविदीर्णम् ।
विजयश्रीर्वीराणां व्युत्पन्नप्रौढवनितेव ॥ ३४६ ॥
स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने
सुखासीनाः शान्तध्वनिषु रजनीषु द्युसरितः ।
भवाभोगोद्विग्नाः शिव शिव शिवेत्यार्तवचसः
कदा स्यामानन्दोद्गतबहुलबाष्पप्लुतदृशः ॥ ३४७ ॥

ध्याये ध्याने निवेश्य; J_3 धैर्यध्यानं निवेश्य; X ध्यायञ्चित्ते निवेश्य; $Y_{1.2}$ G_4 ध्याये ध्यानं निवे(Y_2 °वि)श्य; Y_3 ध्येये ध्यानं विशोध्य; M_3 ध्येये ध्यानं निषेव्य; $M_{4.5}$ ध्यायं ध्यायं भवंतं. F_3 -कुहरे ग्राव-; Y_8 M -कुहरग्राम-. F_5 -पर्यंकमूलं; W -शय्यानिषण्णः. — [c]) B $E_{3}t$ X °रामोपलीनो; B_2 m.v. $G_{2.3}$ °रामोफलाशी; F_3 °रामैकलाभो; F_5 °रामोपि लीनो; I °रामे फलाशी; J °रामोपि लीला (for °रामः फलाशी). G_5 -परस्; M_3 -गतस् (for -रतस्). $J_{1.2t.3}$ तत्प्रसादात्; X_1 कृत्पुरस्तात्; X_2 त्वत्पुरस्तात्. D I (orig.) $Y_{4.5}$ मुरारे; Eo F_5 $J_{2}t$ स्मरारेर्; X Y_3 M_3 पुरारे (for स्मरारे). — [d]) Ec दुःखान्. D E_4 F_3 $G_{2}t$ मोक्षे कदाहं; Eo. 3t F_2 मोक्षैक°; W_2 मोक्ष्यै क°; X_1 मोक्ष्ये कदा हे. $F_{2.3}$ समचरणकरे; $J_{2t.3}$ समकरचरणं; J_{2c} करचरणसमं; X स्मरहरचरणे; G_4 करचरणसमे [commentators factor समकर = स + मकर or सम + कर; W com. मकरध्वजे पुंसि मदने सेवा.]. It -समर्थं; Y_8 -समुद्धं; G_1 -समर्थः. E दुःखं मोक्ष्ये (Eo. 3t °क्षे-; Ec दुःखान्मोक्ष्ये) कदाहं तव चरणरतो ध्यानमार्गैकप्रश्नः (Eo °कप्रश्नैः; E_5 °कघस्रैः).

BIS. 7238 (3313) Bhartṛ. ed. Bohl. 3. 88. Haeb. 83. lith. ed. I and II. 86, III. 84. Galan 82.

346 {N} Om. in A C J_1 **S** BORI 326. — [b]) B_1 F_5 -विदीर्णां; It -विकीर्णां; $J_{2.3}$ विदीर्णां. — [c]) $F_{1.3}$ J_2 विजयश्री-. — [d]) Eo. 3 व्युत्पन्ना; J_2 वृक्षं न (for व्युत्पन्न-). J_3 उत्पन्नवनिताविव.

BIS. 7251 (5327) Bhartṛ. ed. Bohl. extra 18. Haeb. 2. 97. Śatakāv. 92; SRB. p. 78. 5.

347 {V} Om. in I, BORI 329 and Punjab 2101. Y_7 missing. — [a]) D शरच्चंद्र-; Eo. 2–4 स्फुरत्स्फारा; F_2 J_3 स्फुरस्फार-; X स्फुरच्चंद्र-; $G_{2}t$ स्फुरत्स्फूर- (for स्फुरत्स्फार-). — [b]) Eo. 20. 5 Y_3 T_3 M_4 सुखासीनः; E_3 सुखाशीनाः; $F_{1.4}$ समासीनाः; J_2 समासीनः. C श्रांत-; W_2 T_2 शांता- (for शान्त-). D क्व सरितः; F_3 क्व परितः (for द्युसरितः). — [c]) Eo. 3. 5 °गोद्विग्नः; $H_{1}t.3t$ T_3 J_2 °गोद्विघ्नाः. B E_3 $H_{1o.2.3}$ M_5 °त्यास्त-; F_2 °त्यस्त-; J_1 °त्यर्थ-; W X $Y_{2.4–6.8}$ T_1 (c.v. as in text) $G_{1.4.5}$ $M_{1.2}$ °त्युच्च-; Y_1 °त्यच्छ-; M_3 °त्युक्त- (for °त्यार्त-). A_2 $E_{3.4}$ -वचसा; A_3 -वचनाः. — [d]) J_3 कथं (for कदा). C E_2 स्यामो हर्षोद्गत-; F_2 स्यामो मोदोद्गत-; F_3 स्यामो नंदोद्गत-; W $Y_{4–6.8}$ T $G_{4.5}$ मास्यामोंतर्गत-; X स्यामो नंदामृत-; G_1 $M_{1–3}$ नु (M_3 om. नु) स्यामोंतर्गत-(for स्यामानन्दोद्गत-). C D $E_{2.4}$ $F_{2–5}$ W_1 Y_3 M -बहल-. C $F_{2.3.5}$ J W X Y (Y_7 missing) T $G_{1.4.5}$ $M_{1–3.5}$ -बाष्पाकुल-; $E_{5}t$ M_4 -बाष्पाप्लुत-. A_2 Eo. 3–5 W_4 -दृशा; $Y_{4–6}$ T_2 -दृशां; Y_8 $T_{1.3}$ -दशां; $T_{1}ov.$ -दृशं (for -दृशः).

BIS. 7254 (3317) Bhartṛ. ed. Bohl. 3. 85. Haeb. 80. lith. ed. I. 83, II. 42, III. 81. Galan 79; SSD. 4. f. 30a.

स्मृता भवति तापाय दृष्टा चोन्मादवर्धिनी ।
स्पृष्टा भवति मोहाय सा नाम दयिता कथम् ॥ ३४८ ॥

स्रजो हृद्यामोदा व्यजनपवनश् चन्द्रकिरणाः
परागः कासारो मलयजरजः सीधु विशदम् ।
शुचिः सौधोत्सङ्गः प्रतनु वसनं पङ्कजदृशो
निदाघर्तावेतद् विलसति लभन्ते सुकृतिनः ॥ ३४९ ॥

स्वल्पस्नायुवसावशेषमलिनं निर्मांसमप्यस्थिकं
श्वा लब्ध्वा परितोषमेति न च तत् तस्य क्षुधाशान्तये ।

---

348 {Ś} Om. in F5 I, BORI 326, BU and Punjab 697. E3 order *acbd*. — [a]) F4 J2 W1.4 Y2.3 G1.3.5 M3 श्रुता; J1 W2 Y6.7 श्रुत्वा W3 स्मृत्वा; G2 श्रुतं (for स्मृता). B2 (orig.) E2t Y1t पापाय; F2 तपाय; W4 तामाय. — [b]) A2 E0.2t.3 J W X2 Y7 G4 M2.3 दृष्ट्वा. B E1 (and Ec) F1.2 H तु (for च). E0.1 F4 °वर्धनी; F1-3 H Y1B 2.6.8 T G1-3.5 °कारिणी (for °वर्धिनी). — [c]) E3t दृष्टा; J W2-4 Y1B G4 स्पृष्ट्वा. Y1B भवतु. C G1 पापाय; J1c दोषाय (for मोहाय). D स्पृष्टा मोहाय जगतां. — [d]) J1 सा नामा; Y6 साधूनां; Y7 सा नारी (for सा नाम).

BIS 6565 (3320) Bhartṛ. ed. Bohl. 1. 73. Haeb. 76. lith. ed. II. 30. Subhāsh. 17, 133 and 293; SBH. 1225; SRH. 183. 3 (Vallabha); SS. 44. 26; SU. 566; SN. 275; SSV. 1393; JS. 404; SLP. 4. 75 (Bh.).

349 {Ś} Om. in C, Jodhpur 3 and Ujjain 6414. Omitted or missing in F5. Wrongly om. in B2. NS1 Ś94, V3. — [a]) J G1 हृद्यामोद-; X हृद्यामोदो. F2.4 -पवनाश्; H -पवनं; G1 -किरणश् (for -पवनश्). B1 T3 G1.4 M1-4 चंद्रकिरणः; H चंद्रकिरणान्; G2t चंद्रिकिरण. — [b]) H परागं; J1 प्रसन्नः; M5 वरांगः (for परागः). E3 कासारान्; F4 पुष्पाणां; H कासारं. B1 F2.4 It J Y7 M1-3 °रसः; D G4 °रसाः; H °रसं. A2 E3c F1.2 Y3 G1.2t सिंधुविशदं (G1 °दः); D शीधुविशदं; E2t.3c J2 X2 Y4-8 T1.3 G5 शीधु विशदं; W4 सीधु विषदं; G3 M4.5 शीथु विशदं; G4 लोध्रविशदः; M1.2 शीथु विशदः; M3 शीतविशदः. — [c]) H शुचिं; G1 रुचिः. H सौधोत्संगं. A E3t.4t F3 वचनं; Y3 -वसनाः; G1 -तपनः; M3 -वचनाः (for वसनं). — [d]) D निदाघार्ते चैतद्; E J2 Y2 T2 M4.5 निदाघार्तावेतद्; F3 निदाघार्ताश्चैता; W निदाघास्तू(W1 °त्त्)र्णे तद्; X निदाघार्तावेते; Y3 निदाघांते चैतद्; G1 निदाघावर्तापिद्; G4 निदाघात्तौ केचिद्; M2 निदाघे तानेतान्; M3 निदाघार्तापेताद्. W X सुखमुप- (for विलसति). Y1B भवंते (for लभन्ते).

BIS. 7263 (3322) Bhartṛ. ed. Bohl. 1. 39. Haeb. 42. lith. ed. II. 93. Śatakāv. 67. SK. 3. 335; SLP. 5. 29 (Bh.).

350 {N} Om. in X. — [a]) A3 J2 स्वम-; B2 D F3-5 W H Y1 स्वल्पं; J1t अल्प-; Y3 स्वल्पः. A1 E3 J1t -वशावशेष-; B2 -वशाविशेष-; E0-2.5 °-वशादशेष-; F1 W4 (by corr.) Y1.4-8 T G4.5 M -वसावसेक-; F2 G1 -वसावसैक-; F5 -वशावशेन; Ic -वसाविशेष-; G2.3 -वसावसेन. C F1.2 J W Y3-8 T G4 M4.5 अप्यस्थि गोः; M3 अप्यस्थितं. — [b]) B1 स्वालब्ध्वा; B2 C D E0-3.5t W1.2 Y3 श्वा लब्धा; Ic M3 कं लब्ध्वा; J2 श्वा लब्धो. F4 (m. v. as in text) नितरामास्म-; J1t लभतस्तस्य; W न तु तत्तस्य; Y1 न

सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम् ॥ ३५० ॥
स्वादिष्ठं मधुनो घृताच् च रसवद् यत् प्रस्रवत्यक्षरं
  दैवी वागमृतात्मनो रसवतस् तेनैव तृप्ता वयम् ।
कुक्षौ यावदमी भवन्ति धृतये भिक्षाहृताः सक्तवस्
  तावद् दास्यकृता जनैर्न हि धनैर्भोगान् समीहामहे ॥ ३५१ ॥
हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत् कल्पितं
  व्यालानां पशवस् तृणाङ्कुरभुजः सृष्टाः स्थलीशायिनः ।
संसारार्णवलङ्घनक्षमधियां वृत्तिः कृता सा नृणां
  यामन्वेषयतां प्रयान्ति सततं सर्वे समाप्तिं गुणाः ॥ ३५२ ॥

पुनस्तस्यात्; Y2 M1. 3–5 न पुनस्तस्य (for न च तत्तस्य). W3. 4 (by corr.) G2. 3 क्षुधः (for क्षुधा-). C आगतं गतमपि; Y3 एकमागतमपि; T3 अंकमागतवति; G3t अंगमागतमपि. A2. 3 E5 त्यक्ता. Y2 [अ]धिहंति. — d) Y3 सर्वं; G1. 4 M2. 3 प्रायः (for सर्वः). W2 कृत्स्नगतोपि. Y3 वांछित-. C स्वात्मानुरूपं; G2. 3 सत्त्वानुकूलं.

BIS. 7322 (3335) Bhartṛ. ed. Bohl. 2. 33. Haeb. 34. lith. ed. I, II and Galan 30, III. 18. Pañc. ed. Orn. I. 12. Hit. II. 39. ed. Rodr. p. 160. Subhāsh. 307; SRB. p. 79. 22; SBH. 1025 (Pañc.); Tantrākhyāyika I. 7; Edgerton. I. 9; SSD. 2. f. 102b.

351 { V } Found in A B C D E, F1 V12, ISM Gore 144 V194 [Also BORI 329, Punjab 2101 and Jodhpur 3 V7; GVS 2387 and NS1 V10; NS2 V8, V94 (93); BU V9; NS3 V105 (extra)]. — a) F1 यन्मिष्टं (for स्वादिष्ठं). A रसाच्च; C F1 घृताश्च; E घृतादि. A1c. 2 F1 यत्प्रश्रवत्यक्षरं; B यच्चच्छ्रवत्यक्षयं; D यत्प्रत्यपधाक्षरं; E0 यत्प्रप्लवत्यक्षरं; E2 प्लवत्यक्षरं; E5 आप्रश्रवत्यक्षरं. — b) D E ISM Gore देवी. B C °तात्मना. B C रसवता; D रसवती. B2 तृष्णा (for तृप्ता). — c) C रूक्षा (for कुक्षौ); E5 भिक्षाहृतां. A1c E3 शक्तवस्. — d) B C E0. 3 F1° कृतार्जै(E0 जु)नैर्न हि धनैर्; E5 °कृतार्जैनैव वसुभिर्. ISM Gore नि- (for हि). C वृत्तिं (for भोगान्). D समीहाम ते; E2 समीहामहे.

BIS. 7337 (5374) Bhartṛ. ed Bohl. 3. 97. Haeb. 92. Śatakāv. 109. Missing in the MSS. compared by Bohl. and Weber.

352 { V } Om. in W. Missing in Y7. — a) Y1. 2. 4–6 T2. 3 °लब्धम्; Y3 °लाभम् (for °लभ्यम्). F2 Y3 कल्पितो. — b) G1 M2 इतरे (for पशवस्). A3 E0. 3t Y2. 3 M5 स्पृष्टाः; D पुष्टाः; J Y4. 6. 3 T G4 तुष्टाः; M3 स्वस्थाः (for सृष्टाः). — c) Y3 °लंघने. Y1 -स्थिरधियां; M4 -क्षमधिया. J2t वृत्तिं; J2c वृत्तः; T2. 3 युक्तिः (for वृत्तिः). — d) J1. 3 यावन्वेषयतां; Y5. 6. 3 T1 G4 तामन्वेषयतां. E3t. 5t F1 Y3 G2 प्रयाति. C Y3 सहसा (for सततं). G1 गताः (for गुणाः).

BIS. 5437 (2460) Bhartṛ. ed. Bohl. 3. 98. Haeb. 94. lith ed. II. 10. Śantiśataka 1. 13 (Haeb. 412). Kāvyakal. and Kāvyas. 23; SRB. p. 97. 13 (Bh.); SBH. 3139 (Bh.); SHV. f. 1a. 2 (Bh.); SU. 1052; SSD. 4. f. 2a.

GROUP III

[Stray verses from single versions, isolated Bhartṛ. MSS, and anthologies; in alphabetical order; only a few variants have been reported.]

अकिंचनस्य दान्तस्य शान्तस्य समचेतसः ।
मया संतुष्टमनसः सर्वाः सुखमया दिशः ॥ ३५३ ॥

अक्रोधवैराग्यजितेन्द्रियत्वं क्षमादयाशान्तिजनप्रियत्वम् ।
निर्लोभदाता भयशोकहारी ज्ञानस्य चिह्नं भयलक्षणानि ॥ ३५४ ॥

अङ्गुल्यः पञ्चमे मासे दृष्टिकुक्षौ च षष्ठमे ।
संचारः सप्तमे मासे अष्टमे नयनेषु च ॥ ३५५ ॥

अङ्गेन गात्रं नयनेन वक्त्रं न्यायेन राज्यं लवणेन भोज्यम् ।
धर्मेण हीनं खलु जीवितं च न राजते चन्द्रमसा विना निशा ॥ ३५६ ॥

अजातमृतमूर्खेभ्यो मृताजातौ सुतौ वरम् ।
यतस् तौ स्वल्पदुःखाय यावज्जीवं जडो दहेत् ॥ ३५७ ॥

अज्ञं कर्माणि लिम्पन्ति तज्ज्ञं कर्म न लिम्पति ।
लिप्यते रसनैवैका सर्पिषा करवद् यथा ॥ ३५८ ॥

अज्ञानामवनीभुजामहरहः स्वर्णाभिषेकोत्सवाज्
  ज्ञातुः श्रीयुवरङ्गभूपरसिकश्लाघैव संमानना ।
सारासारविवेकशून्यरमणीसंभोगसाम्राज्यतः
  सारङ्गेन्दुमुखीविलोककपटश्चातुर्ययूनां मुदे ॥ ३५९ ॥

अज्ञेष्वज्ञो गुणिषु गुणवान् पण्डिते पण्डितोऽसौ
  दीने दीनः सुखिनि सुखवान् भोगिनो भोगिभावः ।
ज्ञाता ज्ञातुर्युवतिषु युवा वाग्मिनां तत्त्ववेत्ता
  धन्यः सोऽयं भवति भुवने योऽवधूतेऽवधूतः ॥ ३६० ॥

अत्र यत् पतितं वर्णबिन्दुमात्राविसर्गकम् ।
भ्रमप्रमाददोषाद् हि क्षन्तव्यं तत् सुबुद्धिभिः ॥ ३६१ ॥

---

353 ISM Kaḷamkar195 V104 (107). — BIS. 26 (3372). Bhartṛ. lith. ed. I. 3. 100; SRB. p. 75. 10. 354 BORI 326 V106 (105). — SL. f. 57a. 355 Meh V147. 356 HU2145 N125 (107).

357 — SHV. f. 36a. 170 (Bh.), SS. 49 16; SN. 626; SSD. 2. f. 142a; SV. 522; JSV. 209. 2. 358 Y2 N96. 359 J3 extra 2. 360 HU632 f. 8a (marg.). — SRB. p. 178. 1000 (मौने मौनी). 361 ISM Gore144 V186.

अधरामृतेन पित्तं नश्यति वायुः पयोधरयुगेन ।
अनवरतरतेन कफं त्रिदोषशमनं वपुर्नार्याः ॥ ३६२ ॥

अधीत्य सकलं श्रुतं चिरमपास्य घोरं तपो
यदिच्छसि फलं तयोरह हि लाभपूजादिकम् ।
छिनत्सि तरुपल्लवप्रसरमेव शून्याशयः
कथं समुपलिप्सते सुरसमस्य पक्वं फलम् ॥ ३६३ ॥

अध्यात्ममन्वधीयतां भवरसे वैराग्यमानीयतां
विद्वद्भ्यः समधीयतां सुरसरित्तीरे सदा स्थीयताम् ।
भिक्षार्थे व्यवसीयतामनुदिनं सत्कर्म संचीयतां
विष्णुश्च चेतसि धीयतां परतरे ब्रह्मण्यथो लीयताम् ॥ ३६४ ॥

अनन्तविभवभ्रष्टा दौर्भाग्यपरितापिनी ।
शोच्यति प्राप्य जीवत्वं भर्तृहीनेव नायिका ॥ ३६५ ॥

अनर्थमकरागारादस्मात् संसारसागरात् ।
उड्डीयते निरुद्वेगं सर्वत्यागेन पुत्रक ॥ ३६६ ॥

अनल्पं जल्पन्तः कति बत गता नो यमपुरं
पुरस्तादस्माकं विधृतवदना व्यात्तनयनाः ।
अतीता यद्येवं न हि निजहितं चेतसि वयं
वहामो हा मोहाद् विषयविषजातोदनशिनः (?) ॥ ३६७ ॥

---

362 F2 Ś100. — [a]) पीतं. — [b]) नश्यति ते पयोधराह्लोके. — [cd]) अनवरताश्लेषेण न च कम्पत्रिदोषं शमनीयति पथ्या।; BORI 331 Ś105 (107); GVS2387 Ś101. — [a]) अधररसपानेन पित्तं. — [b]) नश्यति वातं पयोधरस्पर्शात्. — [d]) तस्याः (for नार्याः). BVB5 Ś104. — [b]) शमयति वातं (for नश्यति वायुः). — [c]) अविरलसुरतेन. — [d]) स्त्रीणां (for नार्याः); Nag1087 Ś99 (100). — SBH. 2340; SHV. App. II (f. 2a) 13; SLP. 2. 20. 363 BORI328 Ś103. — [c]) छिन्नसि सुतयस्तरो।; BU Ś104. — [a]) चिरमुपास्य. — [b]) तयोरिह हि. — [c]) छिनासि...शून्याशया. — [d]) °लिप्स्यसे; Bik 3279 Ś93 (95); Bik 3280 Ś96.

364 HU468 V113; Ujj6414 V109 (110). — BIS. 3328 (1412) Bhartṛ. in Schiefner and Weber. p. 26. Śāntiśataka 3. 11. in Haeb. 422. Śatakāv. 32. Nītisaṃk. 75; SDK. 5. 68. 2 (p. 322, Bh.).

365 ISM Gore144 V176. 366 ISM Gore144 V183.

367 C V45. — [b]) विधृतनयनाः व्यात्तवदना. — [c]) प्रतीता. — [d]) मोहाद्विषयजातानु-वसिताः; D V96. — [b]) व्यात्तनयनाः. — [c]) प्रतीना[ता?] येप्येवं. — [d]) महामोहादस्माद्विषय°; BORI328 V100 (98); IO 1151b V47; HU1387 V98; HU1376 V44; Bik 3279 V101 (98); Bik 3280 V99 (100).

अनृतं साहसं माया मूर्खत्वमतिलोभता ।
अशौचं निर्दयत्वं च स्त्रीणां दोषाः स्वभावजाः ॥ ३६८ ॥

अन्तर्विषमता ह्येता बहिरेव मनोहराः ।
गुञ्जाफलसमाकारा योषितः केन निर्मिताः ॥ ३६९ ॥

अपि सर्वविदो न राजते वचनं श्रोतरि बोधवर्जिते ।
अपि भर्तरि नष्टलोचने विफलः किं न कलत्रविभ्रमः ॥ ३७० ॥

अपूर्वो दृश्यते वह्निः कामिन्याः स्तनमण्डले ।
दूरतो दहते गात्रं गात्रलग्नः सुशीतलः ॥ ३७१ ॥

अपेक्षन्ते न पात्राणि न स्नेहं न दशान्तरम् ।
सदा लोकहितासक्ता रत्नदीपा इवोत्तमाः ॥ ३७२ ॥

अफलस्यापि वृक्षस्य छायां सर्वः समीहते ।
निर्गुणोऽपि वरं बन्धुर्यः परः पर एव सः ॥ ३७३ ॥

अभित्तावुत्थिते चित्रे दृश्यते भित्तिराततौ ।
अहो विचित्रा मायेयं भ[म?]ग्नं तुण्डं शिला प्लुता ॥ ३७४ ॥

अमेध्यपूर्णे क्रिमिजन्तुसंकुलं स्वभावदुर्गन्धमशौचमध्रुवम् ।
कलेवरे मूत्रपुरीषभाजने रमेत मूढो न रमेत पण्डितः ॥ ३७५ ॥

---

368 D V150; Bik 3280 N39; BORI 326 V105 (104) — b) °लोभतः. — c) अशौच्यं. — BIS. 328 (109) Vṛddhacāṇ. 2. 1; Pañc. ed. orn. I. 149. ed. Bomb. 195; Hit. ed. Schl. ad. I. 189; Johns. I. 208; Vet. in LA p. 21 (III) 17. Galan. Varr. 49. Subhāsh. 219; SRB. p. 348. 1; SRK. p. 113 (Sphuṭaśloka); SM. 1398; SN. 270; SSD. 2. f. 165b; SSV. 1383; JS. 398.

369 D V149; BORI 326 V104 (103). — BIS. 346 (119). Pañc. ed. Koseg. I. 211. IV, 59. ed. Bomb. I. 196. IV. 87. ed. orn. I. 156; Subhāsh. 23. 294; SRB. p. 348. 22; SM. 1411; SSD. 4. f. 20a; SSV. 1396.

370 Bar5199 N5.

371 Wai2 extra 2 (corrupt). — BIS. 451 (161) Śṛngāratilaka 18. Subhāsh. 15; SRB. p. 277. 11; SLP. 3. 26.

372 Y_1 N81 (80); Y_{4-6} $G_{1-3.5}$ and Goa N80. — c) $G_{3.5}$ Goa रक्ता (for -सक्ता). — BIS. 455 (165) Subhāsh. 147; ŚP. 235; SRB. p. 46. 42; SBH. 224; SRH. 31. 3; SA. 16. 1; Padyaracanā (KM. 89 p. 110. 30); SK. 2. 77; SU. 1483; PT. 1. 3; SN. 622; SSD. 2. f. 97a.

373 C N105 (106); BORI329 N103 (98); Bik 3280 N53; Bik 3279 N72. — SA. 37. 6. 374 ISM Gore144 V180. 375 Ady XXV-L-2 Ś41.

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥ ३७६॥

अये दिष्ट्या नष्टो मम गृहपिशाचीपरिचयः
परात्त्वं मोहात् स्फुरति च मनाग् ब्रह्मणि मनः।
विकारोऽप्यक्षाणां गलित इव निर्भाति विषयात्
तथापि क्षेत्रज्ञः स्पृहयति वनाय प्रति मुहुः॥ ३७७॥

अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति।
जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे न जीवति॥३७८॥

अरण्यं सारङ्गैर्गिरिकुहरगेहाश्च हरिभिर्
दिगन्ता मातङ्गैर्वनमपि सरोजैरनुगतम्।
त्वया चक्षुर्मध्यस्तनवदनसौन्दर्यविजितैः
सतां माने म्लाने मरणमथ वा दूरशरणम्॥ ३७९॥

अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं
स्थले कमलरोपणं सुचिरमूषरे वर्षणम्।
श्वपुच्छमवनामितं बधिरकर्णजापः कृतस्
तदन्धमुखमण्डनं यदबुधे जने भाषितम्॥ ३८०॥

अरुणांशुरुचं नवोदितं कुचयुग्मप्रसृतां निभिनीम् (?)।
घनकुङ्कुमरागशङ्किनी मुहुरक्षोयमूर्मिवारिभिः॥ ३८१॥

---

376 — BIS. 550 (203) Bhartṛ. in ŚP. MS. Dānapraśaṁsā 6. 2. 35 in Galan. Hit. ed. Schl. I. 64 ed. Johns. 12; Vikramacaritra 67. Pañcatantra ed. Bomb. V. 38; Śp. 273 (*anon.*); SRB. p. 70. 9; SBH. 498 (Bhaṭṭodbhaṭa); SDK. 5. 35. 2 (p. 301, Keśaṭa); SRH. 168. 6 (Udātta); SA. 16. 13; ST. 5. 5; VS. 356 (Keśaṭa); SU. 1484; PT. 1. 4; SG. f. 15b; SSD. 2. f. 106b; SSV. 443.

377 — SDK. 5. 65. 1 (p. 320, Bh.).

378 C N103 (104) — [b]) देवहतं; BORI329 N100 (95); Bik 3279 N45; Bik 3280 N64. — BIS. 567 (208); Pañc. ed. Koseg. I. 24. ed. Bomb. I. 20. 323. V. 44. Hit. ed. Schl. II. 17. ed. Johns. 16; Śp. 446; SRB. p. 91. 47; SRK. p. 72, 26 (Prasaṅgaratnāvalī); SRH. 35. 55 (Itihāsa); SS. 23. 16; SSD. 4. f. 2b; SKG. f. 18b.

379 F4 Ś59. — SRB. p. 177. 990; SRK. p. 234. 39 (Sphuṭaśloka). Mahānāṭaka. 2. 46; SLP. 4. 42.

380 — BIS. 570 (209). Pañc. ed. orn. I. 255; Edgerton I. 104; Tantrākhyāyikā I. 105; SRB. p. 40. 55 (Bh.); SBH. 448 (Bh.); SRH. 124. 20; SRK. p. 37. 25; Kuvalayānanda 68a (53a); Alaṁkārasarvasva (KM. 35 p. 100); SK. 2. 106; PT. 8. 10; SSD. 2. f. 146a; JSV. 120. 2.

381 ASP1888 extra 2.

अर्था हसन्त्युचितदानविहीनचित्तं
भूमिर्नरं च मम भूमिरिति ब्रुवाणम् ।
जारा हसन्ति तनयानुपलालयन्तं
मृत्युर्हसत्यवनिपं रणरङ्गभीरुम् ॥ ३८२ ॥

अर्थाः पादरजःसमा गिरिनदीवेगोपमं यौवनं
मानुष्यं जलबिन्दुलोलचपलं फेनोपमं जीवितम् ।
धर्मं यो न करोति निश्चलमतिः स्वर्गार्गलोद्घाटनं
पश्चात्तापहतो जरापरिणतः शोकाग्निना दह्यते ॥ ३८३ ॥

अवचनं वचनं प्रियसंनिधावनवलोकनमेव विलोकनम् ।
अवयवावरणं च यदंशुकं व्यतिकरेण तरङ्गसमर्पणम् ॥ ३८४ ॥

अवज्ञानाद् राज्ञां भवति नृपहीनः परिचरं
जनस् तत्प्राधान्याद् भवति न समीपे बुधजनः ।
बुधैस् त्यक्ते राज्ञो भवति न च नीतिर्गुणवती
विनष्टायां नीत्यां सकलमपि शुष्येन् नृपकुलम् ॥ ३८५ ॥

अविदितशषसविशेषा वाणी निःसरति वक्त्रतो येषाम् ।
गुदवदनविवरभेदो रदनैरनुमीयते तेषाम् ॥ ३८६ ॥

अविरलमदजलनिवहं भ्रमरकुलानीकसेवितकपोलम् ।
अभिमतफलदातारं कामेशं गणपतिं वन्दे ॥ ३८७ ॥

अव्याधिगात्रमनुकूलतरं कलत्रं
वेश्म प्रसिद्धविभवं निशिता च विद्या ।
श्लाघ्यं कुलं चरमकालगतिः समर्थो
मातुः कटाक्षपरिणामविभूतयस् ते ॥ ३८८ ॥

---

382 Y2 N40. — SRB. p. 176. 956; SRK. p. 226. 54 (Sphuṭaśloka); SL. f. 31a. 383 D V148; Meh V155; BORI 326 V97 (96); HU2144 V96 (92). — BIS. 599 (217). Hit. ed. Schl. I 149. ed. Johns. 163. Vikramaca. 272. Subhāsh. 172; SRK. p. 94. 5 (Bh.); SS. 23. 13; SN. 394.

384 Y3 Ś22. — SDK. 2. 8. 4 (p. 73, Kālidāsa); Kavīndravācanasamuccaya 250. 385 Bik 3280, Ben60-10 and Ben57-4 N13 — [b]) ततस्तत्प्राधान्या°; IO1854 f. 23a extra. — BIS. 653 (241). Hit. ed. Schl. II. 75. ed. Johns. 76. ed. Rodr. p. 177; SRB. p. 152. 412.

386 Ms.5 N. I-11. — BIS. 682; Subhāsh. 258.

387 ISM Kalamkar 195 N1(0), perhaps not meant as a Bhartṛ. śloka.

388 Ady XXIX-E-2 N II, (final, without number).

असत्यमप्रत्ययमूलकारणं कुवासनासद्मसमृद्धिवारणम् ।
विपन्निदानं परवञ्चनोर्जितं कृतापराधं कृतिभिर्विवर्जितम् ॥ ३८९ ॥

असारः संसारः सरसकदलीसारसदृशो
 लसद्विद्युल्लेखाचकितचपलं जीवितमिदम् ।
यदेतत् तारुण्यं नगगतनदीवेगसदृशम्
 अहो धार्ष्ट्यं पुंसां तदपि विषयान् धावति मनः ॥ ३९० ॥

असारे खलु संसारे सुखभ्रान्तिः शरीरिणाम् ।
लालापानमिवाङ्गुष्ठे बालानां स्तन्यविभ्रमः ॥ ३९१ ॥

असीव्यद् देहे स्वे पशुपतिरुमाङ्कं समवनो
 विगुप्तो गोपीभिर्दुहितरमयात् सा कमलभूः ।
यदादेशादेतज् जगदपि मृगीदृक्परवशं
 स वश्यः कस्य स्यादहह विषमो मन्मथभरः ॥ ३९२ ॥

अहिरिव जनयोगं सर्वदा वर्जयेद् यः
 कुणमिव वसु नारीं त्यक्तकामो विरागी ।
विषमिव विषयार्थान् मन्यमानो दुरन्ताञ्
 जयति परमहंसो मुक्तिभावं समेति ॥ ३९३ ॥

अहो अहीनामपि लेहनं स्याद् दुःखानि नूनं नृपसेवनानि ।
एकोऽहिना दष्टमुपैति मृत्युं क्ष्मापेन दष्टस्तु सगोत्रमित्रः ॥ ३९४ ॥

आकाशमुत्पततु गच्छतु वा दिगन्तम्
 अम्भोनिधिं विशतु तिष्ठतु वा यथेच्छम् ।
जन्मान्तरार्जितशुभाशुभकृन्नराणां
 छायेव गच्छति * कर्म फलानुबन्धि ॥ ३९५ ॥

आत्मानं धर्मकृत्यं च पुत्रदारांश् च पीडयन् ।
देवतातिथिभृत्यांश् च स कदर्य इति स्मृतः ॥ ३९६ ॥

---

389 HU 2145 N45 (33). — SRB. p. 83. 2; SRK. p. 112. 2 (Kalpataru).

390 ISM Gore144 V193; GVS2387 V61 and BVB5 V104 (extra) — d) मतिः (for मनः).

391 Gujarati P. P. ed. p. 164 V107. — BPS. f. 42a. 25.

392 Es Ś110 (extra). 393 X V69. 394 Bik 3279 V3.

395 BORI 328 V83 (82). — BIS. 849 (3675). Śantiś. 3. 21 in Haeb. p. 424. Nītisamk. 80; SRB. p. 92. 73. — d) छायेव न त्यजति कर्मफलानुबन्धः; SRK. p. 77. 12 (11) (PT.). 396 ISM Kalamkar195 V90 (93).

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ॥ ३९७ ॥

आदौ मज्जनचीरहारतिलकं नेत्राञ्जनं कुण्डलं
नासामौक्तिकमालतीविकरणं झंकारकं नूपुरम् ।
अङ्गे चन्दनचर्चितं मणिगणः क्षुद्रावलि[र्] घण्टिका
ताम्बूलं करकङ्कणं चतुरता शृङ्गारकाः षोडश ॥ ३९८ ॥

आपन्मूलं खलु युवतयस् तन्निमित्तोऽवमानस्
तासां यावत् सलिललहरीभङ्गुरः पक्षपातः ।
अप्येवं भो परिणतशरच्चन्द्रबिम्बाभिरामं
दूरीकर्तुं वदनकमलं नालमस्मत्प्रियायाः ॥ ३९९ ॥

आयासशतलब्धस्य प्राणेभ्योऽपि गरीयसः ।
गतिरेकैव वित्तस्य दानमन्या विपत्तयः ॥ ४०० ॥

आयुर्लेखा पवनचलना श्लिष्टदीपोपमेया
संपच् चैषा मदवशचलत्कामिनीदृष्टिलोला ।
तीव्रश् चान्तर्दहति हृदयं विप्रयोगः प्रियेभ्यस्
तस्मादेतत् सततममलं ब्रह्म शान्तं प्रपन्नाः ॥ ४०१ ॥

आलिङ्गत्यन्यमन्यं रमयति वचसा लीलया वीक्षतेऽन्यं
रोदित्यन्यस्य हेतोः कलयति शपथैरन्यमन्यं वृणोति ।
शेते चान्येन सार्धं शम[? य]नमुपगता चिन्तयत्यन्यमन्यं
स्त्रीमाया दुश्चरित्रा जगदहितकरी केन कष्टेन सृष्टा ॥ ४०२ ॥

आलोड्य सर्वशास्त्राणि विचार्यैवं पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥ ४०३ ॥

---

397 Āna1788 N101. — BIS. 938 (337). — [a]) आदेयस्य प्रदेयस्य. Hit. ed. Schl. IV. 94. ad. II, 138. ed. Johns. II. 144. IV. 98; SRB. p. 161. 354; SHV. f. 101b. 94; PT 9. 20; BPB. 11.

398 Bik 3275 Ś111. — SBH. 2137. 399 Ms.5 Ś III-20.

400 BVB2 N59; BVB5 extra marg. f. 3b; Bik 3281 and 3278 N65; K. T. Telang's MS. F (Kāthavaṭe) N65. — SRB. p. 69. 13; Tantrākhyāyikā II. 109; SRH. 13. 6. — [d]) शेषा (for अन्या). SS. 17. 15; SM. 1218; SSD. 2. f. 107a; SSV. 1203; SKG. f. 12a; Prabandhacintāmaṇi 265 (Bh.).

401 D V145; BORI 328 V165 (156) — [a]) आयुश्लेषा° — [b]) संपद्द्वेषा... °दृष्टलोला. — [c]) तीव्रस्वान्त°; Bik. 3279 V159 (55).

402 F4 Ś62 — [b]) श्रृणोति (for वृणोति); Ujj6414 Ś62. — SS. 44. 3; SSD. 4. f. 20a. 403 ISM Kalamkar 692 V67.

आशया ये कृता दासास् ते दासाः सर्वदेहिनाम् ।
आशा दासीकृता येन तस्य दासायते जगत् ॥ ४०४ ॥

आशा नाम मनुष्याणां काचिदाश्चर्यशृङ्खला ।
यया [बद्धाः] प्रधावन्ति मुक्तास् तिष्ठन्ति कुत्रचित् ॥ ४०५ ॥

आस्तां सकण्टकमिदं वसुधाधिपत्यं त्रैलोक्यराज्यमपि देव तृणाय मन्ये ।
निःशङ्कसुप्तहरिणीकुलसंकुलासु चेतः परं वलति शैलवनस्थलीषु ॥ ४०६ ॥

आहारनिद्राभयमैथुनं च समानमेतत् पशुभिर्नराणाम् ।
ज्ञाने नराणामधिको विशेषो ज्ञानेन हीनाः पशुभिः समानाः ॥ ४०७ ॥

इदं नासीन् न चोत्पन्नं न चासीन् न भविष्यति ।
तत् तद् ब्रह्मैव सद्रूपमिदमित्थमवस्थितम् ॥ ४०८ ॥

इन्द्रं त्र्यक्षधरं अमन्थमुदधिं पञ्चाननं पद्मजं
सिन्धुं स्वादुजलं शिवं सितगलं कामं च सद्विग्रहम् ।
शैलानक्षधरांश्च तथैव च हयान् लक्ष्मीपतिं पिङ्गलं
जाने सर्वमिदं * * रघुपते दत्त स्वयं हारिणा ॥ ४०९ ॥

इन्द्रः प्रधानं दिवि देवतेषु विप्रो मनुष्येषु नदीषु गङ्गा ।
गावः पशुष्वेषु धने च धान्यं सर्वत्र गात्रस्य शिरः प्रधानम् ॥ ४१० ॥

इयं पल्ली भिल्लैरनुचितसमारम्भरसिकैः
समन्तादाकीर्णा विषविषमबाणप्रणयिभिः ।
तरोरस्य स्कन्धे गमय समयं कीर निभृतं
न वाणी कल्याणी तदिह मुखमुद्रैव शरणम् ॥ ४११ ॥

---

404 V91 in Pt. Gaṅgāprasād's printed ed. Moradabad 1912.

405 Ady XXVIII-G-56 V11. — SRB. p. 76. 10 — [d]) पङ्कवत् (for कुत्रचित्); SRH. 175. 17; SK. 6. 206; SSD. 4. f. 16a.

406 — BIS. 1070 (406). Śāntiś. 2. 15. Haeb. p. 418. Nītisaṁk. 68. Śatakāv. 28. RKB. f. 39a (Bh.); SDK. 5. 65. 3 (p. 320, Śālavāha); SRB. p. 368.34.

407 Ujj 6414 V108 (109); HU 468 V112. — BIS. 1077 (409) Bhartr. in Schiefner and Weber p. 25 ff. Hit ed. Schl. pr. 24. ed. Johns. 25. Daṁpatiśa. 25. Subhāsh. 139. Cāṇakyanītidarpaṇa 17. 17; SA. 7. 10. SS. 14. 15; SN. 175; SSV. 712. 408 ISM Gore 144 V174.

409 MS. Lele (Kolhapur). Extra 2 (corrupt). — SL. f. 31d.

410 C Ś84 — [d]) गात्रं शिरसः; [C₂ Ś89].

411 — BIS. 1129 (3755) Bhartr. in Śp. Śukānyokti 7; Padyaracanā (KM. 89. p. 98. 39, Bh.); VS. 156; SK. 6. 511; SU 1201 (Bh.); SSD. 2. f. 24b.

इयत्येतस्मिन् वा निरवधिचमत्कृत्यतिशयो
वराहो वा राहुः प्रभवति चमत्कारविषयः ।
महीमेको मग्नां यदयमवहद् दन्तशल[क?]लैः
शिरः शेषः शत्रुं निगिलति परं संत्यजति च ॥ ४१२ ॥

इयमुच्चधियामलौकिकी महती कापि कठोरचित्तता ।
उपकृत्य भवन्ति निःस्पृहाः परतः प्रत्युपकारभीरवः ॥ ४१३ ॥

इयमुदरदरी दुरन्तपूरा यदि न भवेदभिमानभङ्गभूमिः ।
कथमिह सा दशा सहन्ते कुटिलकटाक्षनिरीक्षणं नृपाणाम् ॥ ४१४ ॥

इह किं कुरङ्गशावक केदारे कलममञ्जरीं त्यजसि ।
तृणबाणस् तृणधन्वा तृणघटितः कपटपुरुषोऽयम् ॥ ४१५ ॥

इह तुरगशतैः प्रयान्तु मूर्खा धनरहिता विबुधाः प्रयान्तु पद्भ्याम् ।
गिरिशिखरगतापि काकपङ्क्तिः पुलिनगतैर्न समत्वमेति हंसैः ॥ ४१६ ॥

उच्चैरेष तरुः फलं च पृथुलं दृष्ट्वैव हृष्टः शुकः
पक्कं शालिवनं विहाय जडधीस् तां नालिकेरीं गतः ।
तामारुह्य बुभुक्षितेन मनसा बुद्धिः कृता भेदने
आशा तस्य न केवलं विगलिता चञ्चुर्गता चूर्णताम् ॥ ४१७ ॥

उच्छिष्टं करखर्परं पथि गतं मूर्खैर्जडैर्धिकृतं
विप्रैस् तत्त्वविचिन्तकैर्मनसि तं स्वात्मप्रबोधे कृतम् ।

---

412 B N65. — a) °त्यतिशये. — b) वराहो राहुर्वा. — c) °वहद्दन्तसमये. — d) निगलितपरः; E4 N69; BU N66 (64); RASB G7747 N67 (66); NS1 and and Jod 1 N68 (69); Jod 3 N66 (67); Pun 2101 N68 (69); Pun 697 and Bik 3275 N68; Bar 5199 N71; HU 196 N66. — BIS. 1126 (3753) Bhartṛ. ed. Bohl. extra 16. Haeb. 2. 67. Śatakāv. 87; SRB. p. 248. 96.

413 F5 N107 (105); RASB G7747 N111; NS1 N115 (118). — BIS. 1128 (3754) Śp — a) इयमुन्नतिसत्त्वशालिनां — b) महतां — c) दूरतः (for निःस्पृहा). — d) °शङ्कया (for °भीरवः); SA. 27. 63. — a) इयमुन्नतसत्त्वशालिनां — b) महतां — c) दूरतः (for निःस्पृहाः) — d) °संकटाः (for °भीरवः); SKG. f. 17b; SRB. p. 49. 157 (Deveśvara).

414 HU2145 V95 — SRB. p. 96. 6.

415 — BIS. 1134 (3757); Śp. 939; SRB. p. 233. 99; SRK. p. 180. 6 (Rasikajīvana); SU. 1242 (Bh.).

416 — BIS. 1137 (431); Śp. 198; SRB. p. 39. 23; Padyaveṇi 770 (Bh.); PT. 8. 38; BPS. f. 20a. 112; SSD. 2. f. 109a.

417 Bik 3280 N48; Ben60-10 N47. — BIS. 1161. Subhāsh. 173. 257; SRB. p. 241. 140.

418 F1.2 V110 — c) युक्तं (for मुक्तं). — d) मिथस्तालिकाः; SVP159 V extra 20; Pun 697 V122 — a) संदिष्टं करकर्परं पथिगतं क्षुद्रैः कृतं निन्दनं. — b) न समितं चात्मप्रबोधैर्बु-

नृत्यन्तं च दिगम्बरं च जटिलं बालैश्च च मुक्तं जडं
  डिम्भाश्च चोपहसन्ति चत्वरपथे दत्त्वा मुहुस्तालिकाः ॥ ४१८ ॥

उडुगणपरिवारो नायको यः सुधायाः
  शतभिषगनुयातः शंभुमूर्धावतंसः ।
विरहयति न चैनं राजयक्ष्मा शशाङ्कं
  हतविधिपरिपाकः केन वा लङ्घनीयः ॥ ४१९ ॥

उत्खातान् प्रतिरोपयन् कुसुमितांश्च चिन्वन् लघून् वर्धयन्
  कुञ्जान् कण्ठकिनो बहिर्विरचयन् विश्लेषयन् संहतान् ।
अत्युच्चान् नमयञ् शनैरवनतान् संवर्धयन् भूतले
  मालाकार इव प्रपञ्चचतुरो राजा चिरं नन्दति ॥ ४२० ॥

उत्तानोच्छूनमण्डूकपाटितोदरसंनिभे ।
क्लेदिनी स्त्रीसमासक्तिः किं मूढस्य न जायते ॥ ४२१ ॥

उत्तिष्ठ क्षणमेकमुद्वह सखे दारिद्र्यभारं मम
  श्रान्तस्तावदहं क्षणान् मरणजं सेवे त्वदीयं सुखम् ।
इत्युक्तो धनवर्जितेन सहसा गत्वा श्मशाने शवो
  दारिद्र्यान् मरणं वरं वरमिति ज्ञात्वैव तूष्णीं स्थितः ॥ ४२२ ॥

तम्. — [c]) युक्तं (for मुक्तं). — [d]) हत्वा मुहुश्चेटिकां; also HU 271 V133; Meh V152 (धिक् नष्टं); Bik 3278 and 3281 V131 चिन्नष्टं; VSP V132 विभ्रष्टं.

419 X N89. — BIS. 1168. Subhāsh. 130 — [cd]) भवति विकलरश्मिर्मण्डलं प्राप्य भानोः परसदनमुपेतः को न यातो लघुत्वम्; SRB. p. 96. 4 (in परगृहवासः); SBH. 576; SRK. p. 75. 1 (Kalpataru); SA. 31. 4; ST. 25. 6; SHV. App. I (f. 4a); VS. 249; SK. 3. 14; SN. 879; SSD. 2. f. 144a; SMV. 7. 9. [cf. 209].

420 Bik 3280, Ben60-10 and 57-4 N14; IO 1854. f. 23a (extra). — BIS. 1171 (440) Var. Bhartṛ. in Schiefner and Weber p. 26. Navaratna 7 in Haeb. p. 3 in Petrow. p. 38. Nītisaṁk. 34. Śp. 1294; SRB. p. 142. 15; SBH. 2947; SRK. p. 124. 24 (Śp.); SMV. 20. 13, also f. 45b (extra in 75); JSV. 119. 1; Hanūmannāṭaka 9. 34.

421 ISM Kalamkar846 Ś32; NS1 V1 (corrupt), probably extra Ś stanza displaced. — Śp. 4144; SRB. p. 371. 119; SBH. 3341; Jñānārṇava of Śubhacandra; AMD. 460.

422 BORI 326 V8 (7); HU271 V13; Bik1027 V74. — BIS. 1190 (446). Pañc. ed. Koseg. V. 24. Vikramaca. 154b. Subhāsh. 25; Tantrākhāyikā II. 60; SRB. p. 67. 68; SBH. 3195; SDK. 5. 48. 2 (p. 309, Vasukalpa); SRK. p. 56. 6 (Kalpataru); ST. 43. 15; SHV. f. 65a. 682, f. 81a. 78; SSD. 2. f. 140b.

उत्पादिता स्वयमियं यदि तत्तनूजा
तातेन वा यदि तदा भगिनी खलु श्रीः ।
यद्यन्यसंगमवती च तदा परस्त्री
तत्त्यागबद्धमनसः सुधियो भवन्ति ॥ ४२३ ॥

उत्सवादपि नीचानां कलहोऽपि सुखायते ।
कपर्दकार्धलाभेन कुशलो बहु मन्यते ॥ ४२४ ॥

उदग्रा यौवनयोगाः कुरूपं रूपमाधत्ते ।
यथा तथाम्ये केलिंबा[?]अपि च माधुर्यम् ॥ ४२५ ॥

उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायां
न भवति पुनरुक्तं भाषणं सज्जनानाम् ॥ ४२६ ॥

उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च च नागाश्च च वहन्ति नोदिताः ।
अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः ॥ ४२७ ॥

उदेति घनमण्डली नटति नीलकण्ठावली
तडिद् वलति सर्वतो वहति केतकीमारुतः ।
तथापि यदि नागतः स सखि तत्र मन्येऽधुना
दधाति मकरध्वजस् त्रुटितसिञ्जिनीकं धनुः ॥ ४२८ ॥

उद्यमं कुर्वतां पुंसां फलं मार्जारकर्मवत् ।
जन्मप्रभृति गौर्नास्ति पयः पिबति नित्यशः ॥ ४२९ ॥

---

423 — SRB. p. 70. 36 (Bh.); SBH. 523 (Bh.); SS. **17**. 42; **SM. 1175**; **SN. 444**; SSV. 1161.   424 ISM Gore144 V187.

425 BORI 329 N115 (110) corrupt.

426 Wai2 extra 5. — [d]) न चलद्विद्रुशा भामिनि कर्मलेषा (corrupt); MS. **Lele** (**Kolhapur**) **extra** 1. — BIS. 1232 (462), **Vikramaca.** 249. **Kavibhaṭṭa Padyasaṃgraha** 6 in Haeb. 530. Prasaṅgābh. 15b. Subhāsh. 209; SRB. p. 51. **222**, **VS. 846**; SS. **46**. 4; SL. f. 28b; SN. 796; SSD. **2**. f. **100a**; **SSV. 316**.

427 — SHV. f. 31b. 99 (Bh.); SS. **14**. 13; SK. f. 147b; PT. **3**. 3; **SN. 725**; **SSD. 2. f. 102a**; **SMV. 9. 15**.

428 Wai2 Ś101 (corrupt). — SU. 513; SK. **3**. 312; **SRB. p. 341. 57**; **SG. f. 61b**.

429 SVP159 V extra 21. — **SRB. p.** 82. **1 (Pañc.)**; **SSV. 331**; **JS. 70**; **JSV. f. 303a (margin.)**.

उद्यानेषु विचित्रभोजनविधिस्तीव्रातितीव्रं तपः
  कौपीनावरणं सुवस्त्रममितं भिक्षाटनं मण्डनम् ।
आसन्नं मरणं च मङ्गलसमं सत्यं समुत्पद्यते
  यां काशीं परिहृत्य हन्त विबुधैरन्यत्र किं स्थीयते ॥ ४३० ॥
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।
पयःपानं भुजंगानां केवलं विषवर्धनम् ॥ ४३१ ॥
उरो मासद्वये जाते त्रिभिर्मासैस्तथोदरम् ।
चतुर्मासैर्नितम्बं च हस्तपादाविव स्थितः ॥ ४३२ ॥
एक एव खगो मानी चिरं जीवतु चातकः ।
पिपासितो वा म्रियते याचते वा पुरंदरम् ॥ ४३३ ॥
एक एव सतां दोषो द्वितीयो नोपपद्यते ।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः ॥ ४३४ ॥
एकान्तशीलस्य दृढव्रतस्य पञ्चेन्द्रियप्रीतिनिवर्तकस्य ।
अध्यात्मचिन्तागतमानसस्य मोक्षो ध्रुवं तस्य सहंसकस्य ॥ ४३५ ॥
एतस्मात् कथमिन्द्रजालमपरं स्त्रीगर्भवासोऽस्थिरं
  रेतः श्चे[श्च्यो ?]तति मस्तमस्तकपदाविर्भूतनानाङ्कुरम् ।
पर्यायेण शिशुत्वयौवनजरावेषैरशेषैर्वृतं
  पश्यत्यत्ति शृणोति जिघ्रति मुहुर्निद्राति जागर्ति च ॥ ४३६ ॥

---

430 E V98; F4 V105 (104); GVS 2387 V90; BORI 331 V123; BORI 381/1884–87 V99 Meh and Bik 3278 V102; Bik 3279 V109 (6); Bik 3280 V105 (106); Bik 3281 V101 (102); VSP V103; Harilal's lith. ed. V88. — BIS. 1253 (3791); Bhartṛ. lith. ed. II. **3**. 88.

431 Wai2 extra 8. — BIS. 1287 (489). Pañc. I. 434. Hit. III. 4 (*cdab*). Galan Varr. 142 (*cdab*). Cāṇ. 73 in Weber. Subhāsh. 151; Śp. 418 (Cāṇakya); SRB. p. 39. 4 (Cāṇakya); SA. **27**. 46. — [a]) उपकारोऽपि नीचानां; SU. 1532; PT. **8**. 26; SSD. **2**. f. 131b; SSV. 683; SMV. **23**. 21; JSV. **209**. 6. 432 Meh V146.

433 A N10. — BIS. 1340 (514). Cāt. 8 in Haeb. p. 239. 6 in Ewald Z. f. d. K. d. M. IV. 375. Subhāsh 298; Śp. 852; SBH. 674; SRB. p. 226. 148; SRK. p. 189. 2 (Śp.); SDK. **4**. 66. 3 (p. 273); SRH. **102**. 6 (Pañcatantra); ST. **6**. 2; VS. 86; SK. **3**. 147; SU. 1183; PT. **10**. 43; PMT. 223; SG. f. 14a; SM. 1574; BPS. f. 35a. 225; SSV. 1546; SMV. **28**. 4; JS. 474; JSV. **284**. 3; SKG. f. 18a.

434 C V106 (107); BORI 329 N105 (100); Bik 3280 N63; Bik 3279 N44. — BIS. 1341 (3818, cf. also 520). Mbh. **5**. 1018 (crit. ed. 5. 33. 47), **12**. 5959; SA. **23**. 5; SN. 555; SSV. 1533; JS. 468.

435 GVS. 2387 V68; ISM Gore144 V190.

436 BORI 328 V145 (137); GVS 2387 V150. — [a]) यद्गर्भवासस्थितं. — [b]) स्वविमस्तकपदाप्रोद्भूतभव्यांकुरम् । — °जराभेदैरनेकैर्भूतं. — [d]) वपुर (for मुहुर); Meh V144 संदेहा°; Bik 3279 V141 (37).

एतस्याः स्तनभारभङ्गुरभुरः कीर्णा नितम्बस्थली
मध्यं मध्यजनाभिगर्तपठितं नाशाचलं चुम्बति ।
धैर्यं धेहि मनःकुरङ्ग पुरतो रोमावलीवागुराम्
एतद्भ्रान्तिगतागतव्यसनिनः किं वा विधेयं विधे ॥ ४३७ ॥

एतानि तानि नवयौवनगर्हितानि मिष्टान्नपानशयनासनलालितानि ।
हारार्धहारमणिमण्डितभूषणानि भूमौ पतन्ति विलुठन्ति कलेवराणि ॥४३८॥

एता हसन्ति च रुदन्ति च कार्यहेतोर् विश्वासयन्ति च परं न च विश्वसन्ति ।
तस्मान् नरेण सु* शीलसमन्वितेन नार्यः श्मशानघटिका इव वर्जनीयाः ॥४३९॥

एते ते दिवसास् त एव तरवस् तास् च प्रगल्भस्त्रियस्
तच् चैवाम्रवनं सकोकिलरुतं सेयं सचन्द्रा निशा ।
वातः सोऽपि च दक्षिणो धृतिहरः सोऽयं वसन्तानिलो
हा तारुण्य विना त्वयाद्य सकलं पालालभारायते ॥ ४४०

ओंकारे सत्प्रदीपे मृगय गृहपतिं सूक्ष्ममेकान्तरस्थं
संयम्य द्वारवाहं पवनमविरतं नायकं चेन्द्रियाणाम् ।
वाग्जालं कस्य हेतोर्वितरसि हि गिरां दृश्यते नैव किंचिद्
देहस्थं पश्य नाथं भ्रमसि किमपरे शास्त्रमोहान्धकारे ॥ ४४१ ॥

कदा भिक्षाभक्ष्यैः करगलितगङ्गाम्बुतरलैः
शरीरं मे स्थास्यत्युपरतसमस्तेन्द्रियसुखम् ।
कदा ब्रह्माभ्यासस्थिरतनुतयारण्यविहगाः
पतिष्यन्ति स्थाणुभ्रमहतधियः स्कन्धशिरसि ॥ ४४२ ॥

---

437 Meh Ś106. 438 BORI 326 V5 (4).

439 E5 V67 (66). — BIS. 1458 (575). Mṛcch. 62. 63. Paño. ed. Koseg. I. 206. ed. orn. 154. ed. Bomb. 192. Vikramac. 16; SRB. p. 355. 8; SRK. p. 105. 3 (BIS.).

440 D V132; F1.2 V109; BORI 331 V133; BORI 328 V142 (134); NS2 V89 (88); Pun697 V121; Pun. 2885 Ś102 (97); BVB5 V117 (extra); Bik3279 V138 (34); Bik3281 V129 (130); Bik3278 V130; GVS. 2387 V119. — a) कृतवस्ताश्चंद्रबिंबानना:. — b) तद्देवासवनं सकोकिलरवः...क्षिपा । — c) वायुर्वातसदक्षिणो मलयजः पंचेषु संदीपितो. — SA. 38. 70; SN. 569.

441 Ujj 6414 V108; HU 468 V111. — BIS. 1491 (3857) Bhartṛ. in Schiefner and Weber. p. 25 Same as 461.

442 — BIS. 1524 (593). Śāntiś. 4. 18 in Haeb. p. 428. Śatakāv. 38 Nitisamk. 88; SRB. p. 368. 56; SDK. 5. 60. 1 (p. 316-7, Bh.).

कन्थासंवरणं कदन्नमशनं ताम्बूलहीनं मुखं
खट्वैका त्रुटिता विशीर्ण * * * जाया जरामर्कटी ।
वृत्तिः कायविशोषणेन शिशवो * * * * * * *
मूढानां सुखलिप्सया ननु तथाप्यास्था गृहस्थाश्रमे ॥ ४४३ ॥

कपिकुलनखमुखविदलिततरुतलनिपतितफलाशिनेपि वरम् ।
न पुनर्धनमदगर्वितभ्रूभृङ्गविलासिनी दृष्टिः ॥ ४४४ ॥

कलिलं चैकरात्रेण पञ्चरात्रेन[०ण]बुद्बुदम् ।
पक्षेकेनाण्डकः सोऽथ मासपूर्णे शिरो कुरु ॥ ४४५ ॥

कल्पान्तपवना वान्तु यान्तु चैकत्वमर्णवाः ।
तपन्तु द्वादशादित्या नास्ति निर्मनसः क्षतिः ॥ ४४६ ॥

कः कालः कानि मित्राणि को देशः कौ व्ययागमौ ।
कश् चाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः ॥ ४४७ ॥

काचिन् मृगाक्षी प्रियविप्रयोगे गन्तुं निशापारमपारयन्ती ।
उद्गातुमादाय करेण वीणामेणाङ्कमालोक्य शनैरहासीत् ॥ ४४८ ॥

कार्कश्यं स्तनयोर्दृशोस् तरलतालीकं मुखे श्लाघ्यते
कौटिल्यं कचसंचये च वदने मान्द्यं त्रिके स्थूलता ।
भीरुत्वं हृदये सदैव कथितं मायाप्रयोगः प्रिये
यासां दोषगणो गुणा मृगदृशां ताः स्युः पशूनां प्रियाः ॥ ४४९ ॥

कावेरीतीरभूमीरुहभुजगवधूभुक्तमुक्तावशिष्टः
कर्णाटीचीनपीनस्तनवसनदशान्दोलनस्पन्दमन्दः ।
लोलल्लाटीललाटालकतिलकलतालास्यलीलाविलोलः
कष्टं भो दाक्षिणात्य प्रचलति पवनः पान्थ कान्ताकृतान्तः ॥४५०॥

---

443 BVB2 V103.

444 BVB2 (f. 13a) V extra on marg. Bik 3275 V11. — [b]) भोजने न वरम्. — [d]) विकारिणी दृष्टिः. 445 Meh. V145. cf. Garbhopaniṣad 3.

446 ISM Gore 144 V175. — Śp. 4223. 447 Nag299 N119.

448 Ms.5 Ś II–2. — Śp. 519; SRB. p. 185. 31; SRK. p. 147; 6 (Śp.); SK. 3. 381; SL. f. 11a; BPS. f. 30a. 191.

449 E3 V65 (interpolation?). — BIS. 1670 (647) Pañc. ed. Koseg. I. 205. ed. orn. 153. ed. Bomb. 190; SRB. p. 350. 78.

450 E2 Ś112 (extra). — Śp. 3811 (Rākṣasapaṇḍita); SRB. p. 335. 136; SU. 811 (Akbarī-Kālidāsa); Padyaveṇī 607; SG. f. 73b; BPS. f. 25a. 156.

किं कन्दाः कन्दरेभ्यः प्रलयमुपगताः पादपाः किं विशीर्णाः
 किं वा शोषं गतास्ते गिरिकुहरगता निर्झरा वारिपूर्णाः ।
किं तद् वैराग्यमूलं सुचरितनिशितं ज्ञानखड्गं प्रनष्टं
 येन द्वारे नृपाणां धनमदमलिनाः सङ्गमायान्ति धीराः ॥ ४५१ ॥

किं कर्पूरैः किमु मलयजैरम्बुभिः किं हिमांशोः
 किं ताम्बूलैः किमथ वसनैः किं नु भोज्यैर्दुरापैः ।
चिद्रूपाणां सरसवचसां सज्जनानां प्रियाणां
 लीलागोष्ठी यदि सवयसां लभ्यते पुण्यलभ्या ॥ ४५२ ॥

किंचिदन्तर्हिते भानौ पद्मिनी वीतरागिणी ।
आलिङ्ग्य मधुपं शेते प्रियः को नाम योषिताम् ॥ ४५३ ॥

किं तेन हेमगिरिणा रजताद्रिणा वा यत्राश्रिताश्च तरवस्तरवस्त एव ।
मन्यामहे मलयमेव यदाश्रयेण कङ्कोलनिम्बकटुजान्यपि चन्दनानि ॥ ४५४ ॥

किं बाले तव सुव्रणोऽयमधरो गात्रं च किं ते श्लथं
 रात्रावद्य विदग्धभोगपटुना दष्टा भुजंगेन वै ।
यद्येवं सहसा मृतो[ता]सि न कथं कालेन दष्टा सती
 जप्तं तत्समयेऽप्यनन्यमनसा हाहेति मन्त्रो मया ॥ ४५५ ॥

किं यामि विक्रमपुरं किमु कामरूपं किं यामि दक्षिणपथं मथुरां व्रजामि ।
आराधयामि शिवनाथमनाथनाथं विम्बायमानहृदयः किमहं करोमि ॥ ४५६ ॥

किं शाकानि न सन्ति भूधरसरित्कुञ्जेषु मूलानि वा
 किं वा जीवनमेतदेव विहितं यद् वा वनं न क्वचित् ।
येन श्रीमदमोहमूढमनसां स्थित्वाग्रतो भूभृतां
 श्वासोत्कम्पकदर्थिताक्षरपदं देहीति वागुच्यते ॥ ४५७ ॥

---

451 F2 V60. — [a]) किं दाराः कन्दराभ्यः । — [b]) Omitted. — [c]) °ग्ययुक्तं (for °ग्यमूलं). — [d]) धनमलिनमनां सङ्गतिं यान्ति धीराः (sic); Jodhpur1 and Nag 1087 V59. BVB5 V62. — [c]) ते (for तद्)...विनष्टं. Also Nag421 V64; Meh V159. — BIS. 1725 (665) as variant for किं कन्दाः कन्दरेभ्यः from Subhāsh. 66.

452 Pun2101 N extra 3 (on marg.); NS1 N117 (119). — SS. 57. 9.

453 G1 Ś III-10. — [b]) पद्मिनीव विरा°. — [c]) मधुपः; M1.2 Ś III-11. Adyar XXIII-B-10 Ś III-11; Pun2885 Ś 60 (54). HU2133 and BORI Limaye273 Ś 56; Pun1538 extra 2; Śrū309 Ś 26. — [b]) गूढरागिणी. — [c]) मधुरं.

454 W N49. — [d]) v.l. कटुकान्यपि, कटुजा अपि. — BIS. 1754 (681) Bhartṛ. ed. Bohl. extra 8. lith. ed: I and III. 2. 78. Galan. 80. Vetālabh. Nītipr. 12. in Haeb. p. 528; Śp. 1067 (*cdab*); SRB. p. 215. 7; SBH. 1006; SDK. 4.34. 1 (p. 249); SRK. p. 19. 77, p. 196. 4 (Śp.); VS. 294; SS. 29. 6; SK. 2. 186, 6. 178; SU. 1323; PT. 10. 12; SSD. 2. f. 54; SMV. 9. 25; SKG. f. 15b.

455 Bikaner 3275 Ś 85. 456 HU271 V3; Bik3277 N I-4.

457 C and Rāj4 V73. — [a]) शाका विरमन्ति. — [b]) चात्रैव वान्यत्क्वचित्. — [c]) भूभुजां (for भूभृतां). — [d]) °ताक्षरपदा. F1 V70; F4 V76 (75); IO 1151b V72; Nag421 V66; RASB11030 V74. — SBH. 3472.

कियती पञ्चसहस्री कियती लक्षापि कोटिरपि कियती।
औदार्योन्नतमनसां रत्नवती वसुमती कियती॥ ४५८॥

कीर्तिस् ते धनिका धनं मधुरिमा तस्याधमर्णा सुधा
शीतांशुप्रतिभूस् तदर्थनमियं कर्तुं दिवं धावति।
सा लीना तव वाचि भोजनृपते चन्द्रो निरङ्क्षिध्वनिः
शङ्कातोकभृदंशुकावृततनुर्नक्तं परिभ्रामति॥ ४५९॥

कुचशैलसंनिधाने त्रिवलिनदीतीरे तन्वाः कुचचत्वरे चपले।
दृश्यं छलयति पिशाचः पुरुषाणां हि मनागपि शवलितम्॥ ४६०॥

कृत्वोंकारप्रदीपं मृगय गृहपतिं सूक्ष्मनाड्यन्तरस्थं
संयम्य द्वारवाहं पवनपटुतरं नायकं चेन्द्रियाणाम्।
वाग्जालं कस्य हेतोः प्रलपसि बहुधा दृश्यते नैव किंचिद्
देहस्थं पश्य नाथं भ्रमसि किमपरे शास्त्रजाले विशाले॥ ४६१॥

कृशोऽपि धन्यः सुजनः सुबुद्धिमान् परोपकारार्थमिहार्थसंपदः।
महापथावस्थितपादपः शुभः कृशोऽपि काष्ठाय फलान्वितः किमु॥ ४६२॥

कृशोऽपि सिंहो न समो गजेन्द्रैः सत्त्वं प्रधानं न च मांसराशिः।
अनेकवृन्दानि वने गजानां सिंहस्य नादेन मदं त्यजन्ति॥ ४६३॥

कृष्णः करोतु कल्याणं कंसकुञ्जरकेसरी।
कालिन्दीकूलकल्लोलकोलाहलकुतूहली॥ ४६४॥

केषांचिन् निजवेश्मनि स्थितवतामालस्यवश्यात्मनां
दृश्यन्ते प[फ]लिता लता इव चिरं संपन्नशाखाः श्रियः।
अब्धिं लङ्घयतां खनीः खनयतां क्षोणीतलं क्षुन्दताम्
अन्येषां व्यवसायसाहसधियां तन् नास्ति यत् पच्यते॥ ४६५॥

कैवर्तकर्कशग्रहविच्युतोऽसौ जाले पुनर्निपतितः शफरो वराकः।
जालात् पुनर्विगलितोऽपि धृतो बकेन दैवाहतो व्रजति यत्र विपत्पुरस्तात्॥४६६

458 BORI 326 Ś80; VSP Ś 101. — SRB. p. 70. 23; SHV. f. 69a. 738; SS. 17. 48; SSV. 550. 459 Js extra 4.

460 Bik 3280 Ś102; Bik3279 Ś 98(99); Pun1538 N100.

461 ISM Gore 144. V191; GVS2387 V69. — c) नटयसि (for प्रलपसि). BVB5 V106 (extra); variant of 441. 462 Śrn309 N72.

463 A N46. — BIS. 7504. Subhāsh. 109; SS. 54. 1.

464 Wai2 N1. — JSV. 102. 1.

465 IO3318 (with Hindi trans. by Indrajit) N64. — SRB. p. 95. 126.

466 Bar 5199 N31. — BIS. 1918 (740) Pañc. ed. Koseg. II. 87. Subhāsh 68; SRB. p. 92. 75; SRK. p. 219. 30 (Kalpataru); SG. f. 34a; SSD. 2. f. 52b.

को न याति वशं लोके मुखपिण्डेन पूरितः ।
मृदङ्गो मुखलेपेन करोति मधुरध्वनिम् ॥ ४६७ ॥

को लाभो गुणिसंगमः किमसुखं प्राज्ञेतरैः संगमः
का हानिः समये च्युतिर्निपुणता का धर्मतत्त्वे रतिः ।
कः शूरो विजितेन्द्रियः प्रियतमा कानुव्रता किं धनं
विद्या किं सुखमप्रवासगमनं राज्यं किमाज्ञाफलम् ॥ ४६८ ॥

क्रीडां करिष्यति कियच्चिरमेकहंसः स्निग्धोल्लसत्कलरवोऽपि शरीरवाचाम् ।
कालैरघट्टघटिकावलिपीयमानम् आयुर्जलं पिबति शोषमुपैति यत्र ॥ ४६९ ॥

क्वचिद्वीणानादः क्वचिदपि च हाहेति रुदितं
क्वचिद् विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहः ।
क्वचिद् रम्या रामा क्वचिदपि जराजर्जरतनुर्
न जाने संसारः किममृतमयः किं विषमयः ॥ ४७० ॥

क्षुद्राः सन्ति सहस्रशः स्वभरणव्यापारमात्रोद्यताः
स्वार्थो यस्य परार्थ एव स पुमानेकः सतामग्रणीः ।
दुष्पूरोदरपूरणाय पिबति स्रोतःपतिं वाडवो
जीमूतस्तु निदाघसंभृतजगत्संतापविच्छित्तये ॥ ४७१ ॥

---

467 — BIS. 1930 (748) Bhartṛ. ed. Bohl. extra 20. Haeb. **2.** 105; SRB. p. 156. 156; SRK. p. 232. 20 (Sphutaśloka); ST. **13.** 2. SK. 147a; SL. f. 32b.

468 W N103. — BIS. 1943 (755) Bhartṛ. ed. Bohl. extra 10. lith. ed. I. **2.** 101; III. 102. Galan 105. Nītisaṃk. 27. Kavitamṛtak. 53. Prasaṅgābh. 11b; SRB. p. 180. 1405; SRK. p. 239. 84 (Bh.); SL. f. 30a; SN. 841; SSD. **2.** f. 157a; SMV. **11.** 2.

469 D V142; BORI 328 V160 (51). — [a]) करिष्यसि…एष (for एक-). — [c]) कालारघट्ट. — [d]) झटिति (for पिबति); Bik 3279 V154 (50).

470 A V66; Fs V69 (*acbd*). — [a]) वीणावादः. — [c]) नारी (for रामा). °दपि च जराजीर्णवपुषः; F5 V102. — [a]) -वाद्यं (for -नादः). — [b]) °दपि च सुरा°. — [c]) क्वचिद्रामा रम्याः…गलत्कुष्ठवपुषो (for जरा°); X V68 (*cabd*). — [a]) वाणी (for -नादः). — [b]) हुतासानमतुलं (for सुरा°). — [b]) गलत्कुष्ठरुधिरा (for जरा°); BORI 326 V98 (97) (*acbd*). — [a]) वाद्यं (for नादः). — [c]) क्वचिद्रामा रम्या… -वपुः (for -तनुः); BORI 328 V114 (112); BORI 329 V56; BU V107 (105); Wai2 V92; Jodh1 V77; Jod3 V37 (*bcad*); Pun2101 V55; Pun697 V66; GVS 2387 V121; HU 2144 V97 (93); HU 2145 V106 (99); Meh V114; PU496 V103 (102); Bik 3279 V115 (12); Bik 3280 V111 (12). — BIS. 1989 (3991) Bhartṛ. in Schiefner and Weber. p. 25. Subhāsh. 28. 313; SRB. p. 89. 5 (*bacd*); SBH. 2941. — [a]) नृत्तं गीतं (for वीणानादः); SRK. p. 99. 5 (*bacd* Bh.); RKB. f. 39a (Bh. var.); SMV. **8.** 13 (*bcad*).

471 Nag 421 Tau 4911 and 4934, N12. N15 in Telang's Ms. D. — BIS. 2032 (794) Vikramaca. 5. Śp. 773 (Meghānyokti 9); SRB. p. 52. 257 (*also* p. 230. 37); SBH. 285; SRK. p. 12. 21 (ST.) SA. **27.** 15; Prabandhacintāmaṇi (Siṅghi ed.) 128; ST. **1.** 33; SS. **24.** 13; SK **2.** 74, **6.** 34; SSD. **2.** f. 123a; JSV. **182.** 8; SKG. f. 15b.

क्षोणीशाश्रयिणां परोपकरणाभावादवाप्तश्रियां
कार्पण्यात् सुधियामनध्ययनतो यूनां प्रवासाश्रयात् ।
ज्ञातॄणां हरिपादभक्तिविरहादायुर्वृथा गच्छती-
त्येवं शासनमासनं प्रतिदिनं नादो भवत्युच्चकैः ॥ ४७२ ॥

क्षौमं वासो वनभुवि गुहातीरगङ्गा निपानं
भोज्यं भिक्षा तरुतलगता वीथिका दीर्घशय्या ।
भक्तिः कान्ता हरचरणयोः कीर्तनं क्रीडितानि
ध्यानं शंभोः सुरतिमनिशं त्वत्प्रसादान् ममास्तु ॥ ४७३ ॥

खद्योतो द्योतते तावद् यावन् नोदयते शशी ।
उदिते तु सहस्रांशौ न खद्योतो न चन्द्रमाः ॥ ४७४ ॥

गङ्गातरङ्गनिर्धूतशीतले वा शिलातले ।
सुप्यते सुरतश्रान्तकान्तकान्ताकुचस्थले ॥ ४७५ ॥

